Thanjavur Sarasvati Mahal – Series No. 411

॥ श्रीः ॥

॥ श्रीमद्विखनसमहागुरवे नमः ॥

जगन्नाथपण्डितेन विरचितं

॥ रतिमन्मथनाटकम् ॥

RATIMANMATHA NATAKAM

BY

JAGANNATHAPANDITA

THANJAVUR MAHARAJASERFOJI'S
SARASVATI MAHAL LIBRARY, THANJAVUR.

2000] [Price : 40-00

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

Thanjavur Sarasvati Mahal – Series No. 411

॥ श्रीः ॥

॥ श्रीमद्विखनसमहागुरवे नमः ॥

जगन्नाथपण्डितेन विरचितं

॥ रतिमन्मथनाटकम् ॥

RATIMANMATHANATAKAM

BY

JAGANNATHAPANDITA

Edited by

Srivaikhanasa Kulalankara,
Srivaikhanasa Bhagavatsastra Praveena,
Sangendhi Dr. S. MUTHU BATTER,
M. A., M. Phil., B. Ed., M. L. I. S., Ph. D., Nyaya Siromani,
Sanskrit Lecturer, RKM Vivekananda College,
Mylapore, Chennai - 600 004.

THANJAVUR MAHARAJASERFOJI'S
SARASVATI MAHAL LIBRARY, THANJAVUR.

2000] Price: 40-00

Ratimanmala Natakam
0411
CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy
Sarasvati Mahal Library.Thanjavur-2016

BIBLIOGRAPHICAL DATA

Title of the Book	:	RATIMANMATHANATAKAM
Editor	:	Dr. S. Muthu Batter
Publisher	:	Director Sarasvati Mahal Library Thanjavur
Publication No.	:	411
Language	:	Sanskrit
Edition	:	I Edition
Date of Publication	:	February, 2000
Paper used	:	16 Kg. T. N. P. L.
Size of the Book	:	21×14 cm.
Printing type used	:	16 pt. & 12 pt.
Number of Pages	:	168
No. of copies	:	500
Price	:	Rs. 40-00
Printer	:	Sarasvati Mahal Library Press
Binding	:	Card Board
Subject	:	Drama

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

வெளியீட்டாளர் முகவுரை

சம்ஸ்க்ருதத்தில் காவியங்கள் ச்ரவ்யகாவியம் (காதால் கேட்டு ஆனந்தப்படுவது), த்ருச்யகாவியம் (கண்ணால் பார்த்தும், காதால் கேட்டும் ஆனந்தப்படுவது) என்பதாக இருவகைப்படும். இவைகளில் இரண்டாவதாகச் சொல்லப்பட்டது நாடகமாகும். பல கலைகளுள் சிறந்தது நாடகக்கலை. ஏனெனில் அது உள்ளத்து உணர்வுகளை வெளிப்படுத்தி, அன்பையும், அறிவையும் புகட்டி மக்களின் மனதைப் பண்படுத்தும் உயர்கலை. நாட்டின் சென்ற காலத்தையும், நிகழ்காலத்தையும், வருங்காலத்தையும் தன்னகத்தே காட்டுவது நாடகம். "நாடக வழக்கினும், உலகியல் வழக்கினும், பாடல் சான்ற புலனெறி வழக்கம்" என்பது தொல்காப்பியம். மேலும் கம்பராமாயணத்தில் "பரதநூன்முறை நாடகம் பயனுற பகுப்பன்" என வருவதாலும் அக்காலத்தில் பரத முனிவரின் நாட்டிய நூல் முறையில் நாடகங்கள் இருந்தன என்பதும் புலனாகிறது.

இப்படித் தோன்றிய நாடகங்கள் வரலாற்றுத் தொடர்புடையவை; புராணக் கதைகளைத் தழுவியவை; சமூகக் கற்பனையோடு தோன்றியவை என்பதாகப் பல்வேறு பிரிவுகளைக் கொண்டு விளங்குகின்றன.

புராணக் கதையைத் தழுவி எழுந்த நாடகங்களில் "ரதிமன்மதம்" என்னும் நாடகம் தமிழ்க் கதைச் சுருக்கத்துடன் இந்நூலக வெளியீடாக வெளிவருகிறது. இதனை இயற்கை வர்ணனையுடனும், இலக்கியச் சுவையுடனும் "ஜகந்நாத பண்டிதர்" என்பவர் இயற்றியுள்ளார்.

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

இந்நூலினைக் கதைச் சுருக்கப்பகுதி, பாத்திரபரிசயம், இந்நாடகத்திலுள்ள பிராகிருதத்திற்கு ஸம்ஸ்க்ருதம் முதலியன அமைய சிறப்பான முறையில் பதிப்பித்துள்ள இந்நூலகச் சிறப்புக்கேண்மைப் பதிப்பாசிரியர் திரு. முத்து பட்டர் அவர்களுக்கு எனது பாராட்டுக்கள்.

இந்நூல் வெளியிட நிதியுதவி நல்கிய நடுவண் அரசிற்கு என் நன்றியை உரித்தாக்குகின்றேன்.

இந்நூல் நன்முறையில் வெளிவர ஆவன செய்திருக்கும் இந்நூலக நிருவாக அலுலலர் திரு. சாமி. சிவஞானம் அவர்களுக்கும், நூலக வெளியீட்டு மேலாளர் திரு. அ. பஞ்சநாதன் அவர்களுக்கும், நூலினைச் செம்மையாக அச்சிட்டுள்ள நூலக அச்சகப் பணியாளர்களுக்கும், மேலும் இந்நூல் வெளிவரப் பணிபுரிந்த ஏனையோருக்கும் எனது பாராட்டுக்கள்.

இந்நூல் சம்ஸ்கிருதத்தில் ஆர்வங்கொண்டவர்களுக்கும், நாடக ஆய்வுசெய்யும் மாணவர்களுக்கும் பெரிதும் பயன்படுமெனக் கருதுகிறேன்.

முனைவர். **மூ. இராசாராம்**, இ. ஆ. ப.,
மாவட்ட ஆட்சித் தலைவர்
மற்றும் இயக்குநர்.
சரசுவதி மகால் நூலகம்.

தஞ்சாவூர்.
13—2—2000.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

நூன்முகம்

கவிதை, நாடகம், இசை, ஓவியம், சிற்பம், கட்டடம், நுண்கலைகள்போன்ற கலையில்; உண்மையியல்(realism), கற்பனையியல் (romanticism) என்று இரண்டு பெரும் பிரிவாகத் தொகுக்கப்படுகிறது. சில கவிகள் வாழ்க்கையோடு ஒட்டிய கருத்தையே மிகுதியாகத் தன்னுடைய படைப்பில் (நூலில்) படைத்துத் தருவர். இது உண்மையியல் எனப்படும். சிலர் வாழ்க்கையில் பயிலாத கருத்தை மிகுதியாகக் கொண்டு கற்பனை மூலம் நூலைப் படைத்துத் தருவர். இது கற்பனையியல் எனப்படும். இவை இரண்டில் ஏதேனும் ஒன்று அனைத்து கலைப்படைப்பிலும் இருக்கும். இவ்வாறு தொகுக்கப்படும் கவியின் காவியத்தை (நூலை) படிக்கும்போது படிப்பவர்களுக்கும், நாடகத்தை நடிக்கும் போது அதைப் பார்ப்பவர்களுக்கும் பெருமகிழ்ச்சி (ஆனந்தம்) உண்டாவதையே முக்கியமாகக் கொண்டு அந்நூல் உயர்ந்தது என்பதாகக் கருதுகிறோம். இங்கு சிந்திக்கவேண்டியது, மேற்கூறிய அப்பெருமகிழ்ச்சி ஒரு நூலில் சிறு பகுதியை மட்டும் படிப்பதாலோ, நாடகத்தில் ஒரு காட்சியை மட்டும் பார்ப்பதாலோ ஏற்படாது. அது உண்டாவதற்குக் காரணம் — ஒரு கதையை முழுமையாகப் படிப்போருக்கும், நாடகமாகில் அதை முழுமையாகப் பார்ப்போருக்கும் அந்த நூல்களுள் வர்ணிக்கப்படும் கதாநாயகன் — கதாநாயகியுடன் இரண்டறக் கலப்பதே ஆகும். இப்படைப்பு உலக வாழ்க்கையை ஒட்டியும், கூறுவோன், கூறப்படுவோன், கூறப்படும் பொருள் முதலியவற்றின் தகுதியை குறித்தும் கவியால் காவியம் இயற்றப் படுமாயின் அதில் மனிதன் மெய்மறந்து மகிழ்ச்சியை அடைகிறான் என்பது திண்ணம். ஆனால் சில கவிகளின்

CC-0 Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

கூற்றுப்படி ஒரு காவியம் ரஸத்வனியின் மூலம், வ்யங்கியப் பொருளில் அங்கிரஸத்தை முதன்மையாகக்கொண்டு சிறந்து விளங்குமாயின் அது உயர்ந்த காவியமாக எடுத்துக்கொள்ளப்படுகிறது. இப்படிப்பட்ட காவியம் சம்ஸ்க்ருதத்தில் ச்ரவ்ய காவ்யம், த்ருச்ய காவ்யம் என இரு வகைப்படும். ச்ரவ்ய காவ்யம் என்பது இராமாயணம் மஹாபாரதம் போன்று (பத்ய வடிவில்) குறள் வடிவில் இருப்பதாகும். த்ருச்ய காவ்யம் என்பது பொதுவாக நாடகங்களை குறிப்பதே ஆகும். இந்நாடகங்களை சம்ஸ்க்ருதத்தில் ரூபகம் எனவும் வழங்குவர்.

நாடகத்தைப் பற்றி விரிவாக குறிப்பிடும் நூல் நாட்ய சாஸ்த்ரமாகும். இந்த நாட்ய சாஸ்த்ரம் எவ்வாறு ஏற்பட்டது என்றால் — வேதத்திலுள்ள செய்திகளை அறியாமையான், சூத்திரகாரர்களுக்கும், மற்றவர்க்கும் கண்ணிற்கும், காதிற்கும் ஆனந்தத்தை தரும் நூலை இயற்ற வேண்டும் என்று தேவர்கள் ப்ரும்மாவை வேண்ட அவர் நாட்ய சாஸ்த்ரம் என்ற நூலை இயற்றினார். இந் நாட்டிய சாஸ்த்ரத்தில் கூறப்படும் அனைத்துப் பொருள்களும் ருக்வேதத்திலிருந்தும், கீதிகளை ஸாமவேதத்திலிருந்தும், அபிநயங்களை யஜுர் வேதத்திலிருந்தும், ரஸங்களை அதர்வவேதத்திலிருந்தும் எடுத்துக்கொண்டு இயற்றப்பட்டதாகும். ஆதலால் இதற்கு நாட்யவேதம் என்பதாக புனைப்பெயரும் வழங்கப்படுகிறது. இதை நடிப்பதற்கு தேவர்களால் முடியாமையால் பரத முனிவரைத் தன் நூறு புதல்வரைக்கொண்டு நடிக்கும்படி ப்ரம்மா கூறி பரதரால் ப்ரும்மாவின் முன் இந்நாடகம் நடிக்கப்பட்டது. இவ்வாறு தோன்றிய த்ருச்ய காவியம்/ நாடகம் பத்து வகைப்படும். 1. நாடகம் 2. ப்ரகரணம் 3. பாணம் 4. ப்ரஹஸனம் 5. டிமம் 6. வ்யாயோகம் 7. ஸமவகாரம் 8 வீதி 9. அங்கம் 10 ஈஹாம்ருகம். இவற்றில் முதல் வகையைச் சேர்ந்தது நாம் பார்க்கப்படும் ரதிமன்மத நாடகம்.

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

நூலாசிரியரும் அவரது படைப்புகளும் *

இந்நாடகத்தை இயற்றியவர் ஜகன்னாத பண்டிதர். இவரது பெற்றோர்களின் பெயர் பாலக்ருஷ்ணஸூரீ — லக்ஷ்ம்யம்பிகா. இவரது தந்தை சரபோஜி மன்னரின் அமைச்சர்களில் ஒருவர். இவரது குடும்பத்தினர் மராட்டிய மாநிலத்திலிருந்து தஞ்சையில் குடியமர்ந்த மஹாராஷ்ட்ர ப்ராஹ்மண வம்சத்தைச் சேர்ந்தவர்கள். இவர்களது தாய் மொழி மராட்டி. குலப்பெயர் "உகாவூர்" என்பதாகும். இவர் (ஜகன்னாத பண்டிதர்) தஞ்சையில் பிறந்தவர். இவர் காமேச்வரஸூரி அல்லது காமாக்ஷிஸூரி என்று அழைக்கப் படும் புலவரிடம் கல்வி பயின்றவர், இவர் தனது வாழ்க்கையின் பிற்பகுதியில் சக்தி வழிபாட்டில் (ஸ்ரீவித்யா) ஆவல்கொண்டு பாசுரானந்தர் (புகழ்பெற்ற பாஸ்கரராய தீக்ஷிதர்) அவர்களிடம் ஸ்ரீவித்யா தீக்ஷையைப் பெற்றுக்கொண்டார். இவருடைய தீக்ஷா நாமம் "உமானந்த நாதர்" எனப்படும். இவர் தனது சொந்த பெயரான "ஜகன்னாத பண்டிதர்" என்ற பெயரை விட "உமானந்த நாதர்" என்னும் பெயராலேயே பெரும் புகழ் பெற்றவர். இவர் தீக்ஷை பெறுவதற்கு முன்பும், பின்பும் நூல்களை இயற்றியுள்ளார்.

தீக்ஷை பெறுவதற்கு முன்பு எழுதப்பெற்ற நூல்கள்

1 சரபராஜ விலாசம் : இந்நூல் கி. பி. 1722 - ல் சரபோஜி மஹாராஜாவைக் குறித்து எழுதப்பெற்றதாகும். இது நமது நூலகத்தில் 1990-ஆம் ஆண்டு அச்சாகி வெளிவந்துள்ளது.

---

* " शरभराज विलासः " Ed. by N. Srinivasan, Sanskrit Pandit, Sarasvati Mahal Library, T. M. S. S. M. L. Series No. 311. Page. No. xii.

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

2 வஸுமதீபரிணயம் : இந்நூல் போசல வம்சத்தைச் சேர்ந்த ஏகோஜி மஹாராஜாவின் ப்ரபாவத்தை முக்கிய கருத்தாகக் கொண்டு இயற்றப்பட்டுள்ளது.

3 ஞான விலாச காவ்யம் : இது பற்றி செய்திகள் அறிய இயலவில்லை.

4 ரதிமன்மத நாடகம் : சிவபிரானால் மன்மதன் அழிக்கப்பட்ட பிறகு காமதேவன்/மன்மதன் மறுபடியும் ரதியை எவ்வாறு அடைகிறான் என்ற புராணக் கதையை நாடக வடிவில் இலக்கிய பல்சுவையுடனும் இயற்கை வர்ணனையுடனும் ஸம்ஸ்க்ருத இலக்கியத்திலேயே தனிச்சிறப்புடையதாகவும் இந்த நாடகத்தை இயற்றியிருக்கிறார். இவரது படைப்புக்களில் இந்த நாடகம் தனிச்சிறப்பம்சங்களையும் பெற்றிருக்கிறது என்பதும் குறிப்பிடத்தக்கது.

தீக்ஷை பெற்றுக்கொண்ட பிறகு எழுதப்பெற்ற நூல்கள் :

5 ஹ்ருதயாம்ருதம் : இந்த நூலை கி. பி. 1742 - ல் இயற்றியுள்ளார்.

6 நித்யோத்ஸவம் : இது கி. பி. 1745 - ஆம் ஆண்டு பரசுராம கல்ப ஸூத்ரத்தைப் பின்பற்றி எழுதப் பெற்றதாகும். இந்நூலைப் படிக்கும்போது இவர் தந்த்ர சாஸ்த்ரத்திலும் ஸ்ரீவித்யா உபாஸனையிலும் சிறந்தவராக இருந்ததாகவும் அறியமுடிகிறது.

7 பாஸ்கர விலாசம் : தனது குரு பாஸ்கரானந்தநாதர் வழிபட்ட காஞ்சீபுரம் அருகில் ப்ரஸித்திபெற்று இஷ்டி தேவதை என வழங்கப்படும் "த்ரிபுரஸுந்தரி" அம்பாளைக் குறித்து இயற்றப்பட்ட நூலாகும்.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

8 "ஞானேச்வரி டிப்பணம்[1]: ஞானேச்வரரால் எழுதப் பெற்ற கீதைப் பேருரைக்குரிய (கி. பி. 1747 - ஆம் ஆண்டு மராட்டி மொழியில் எழுதப்பெற்ற) குறிப்புரை நூலாகும்.

9 ஆத்மபோத விவரணம்[2]: (மராட்டி மொழி)

ரதிமன்மத நாடகத்தின் முக்கிய அம்சங்கள்

சிவன் மன்மதனை அழித்த பின்பு மன்மதன் ஸ்ரீகிருஷ்ணனுடைய ஒரு அவதாரமாக பிரத்யும்னன் என்ற பெயரில் இருந்திருக்கிறான் என்பதை புராணத்தில் செவி வழிச் செய்தியாக வழங்கப்பட்டு வருவதை நாடகத்தின் நடுவில் மறைத்து குறிப்பிடப்படுகிறது. ரதியும் மன்மதனும் ஒருவரையொருவர் விரும்பி காதல் கொண்டு செயல்படும்போது சம்பராசுரன் ரதியை கடத்திச் செல்ல தேவர்களால் துதிக்கப்பட்டு சிவபெருமான் கார்த்திகேயனாக அவதாரம் செய்து அசுரனை அழித்து ரதியை மன்மதனுடன் சேர்த்து வைக்கிறார். இதில் சம்பராசுரன், ஸர்வார்த்தஸாதிகை எனும் பரதேவதை, தேவர்களுடைய வழிபாடு போன்றவைகள் முக்கிய கருத்துடையவைகளாகவும், நாடகத்தை திறம்பட எடுத்தியம்புபவைகளாகவும் இருக்கிறது. தசரூபகத்தில் நாடகத்திற்குக் கூறும் லக்ஷணங்கள் அனைத்தும் கையாளப்பட்டு உள்ளது.

சுவடிப் பற்றி

இந்நூலகத்தில் J. L. 646 – D. 4488. J. L. 647 – D. 4489 எண்களுள்ள சுவடிகளிலிருந்து பதிப்பிக்கப்பட்டு இந்நூல் வெளியிடப்படுகிறது. இப்பதிப்பு சம்ஸ்க்ருத

---

* 1 & 2. Sarasvati Mahal Library Descriptive Catalogue of Marathi Manuscripts Vol. I. Page No. 149, 21.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

நாடகத்தில் பற்றுள்ளவர்களுக்கும் பற்பல நாடகங்களுடன் இந்த நாடகத்தையும் ஒப்பு நோக்கும் ஆய்வாளர்களுக்கும் மிகவும் உதவியாக இருக்கும்.

பிற சுவடிகள்

இந்தத் தலைப்பில் உள்ள ஓலைச்சுவடி அலகாபாத் G. N. Jha கேந்திரிய வித்யாபீடத்தில் முழுமையுடன் இருப்பதாகவும் மும்பை பல்கலைக்கழகத்தில் முழுமை அடையாத ஒரு ஓலைச்சுவடி இருப்பதாகவும் NCC மூலம் அறியமுடிகிறது.

மொழிபெயர்ப்பு

இந்நூலை ஓலைச்சுவடியிலிருந்து சம்ஸ்க்ருதத்தில் பதிப்பிப்பது. சமஸ்க்ருத மொழி அறிந்தவர்கள் மட்டுமே அறியமுடியும் என்பதால் அனைவரும் அறியும் வண்ணம் இந்நாடகத்தின் கதைச் சுருக்கத்தைத் தமிழில் மொழி பெயர்த்து வெளியிடப்படுகிறது. சமஸ்க்ருத மொழியை கற்றுக்கொண்டிருப்பவர்களும், கற்றுக்கொள்ள ஆசைப் படுபவர்களும் இந்நாடகக் கதைச்சுருக்கத்தைப் படிப்ப தாலே இந்நூலைப் படிக்க ஆவல் ஏற்படுமென்பது திண்ணம்.

பதிப்பின் முறையும், முக்கியத்துவமும்

ஜகன்னாத பண்டிதரால் இயற்றப்பட்ட இந்நாடகம் நாடகத்தின் விதிமுறைப்படி இயற்றப்பட்டிருப்பதாகும். நாடகத்தின் இயல்புத் தன்மையில் நடீ, விதூஷகன், மாயாவதீ, ராகன், முதிதா, மயூரிகா, சௌரிகா, பரிசாரிகா போன்றவர்கள் ப்ராக்ருதம் என வழங்கப்படும் தாழ்ந்த மொழியில் பேசுவார்கள். இவற்றை சம்ஸ்க்கிருதத்தில் மாற்றி அடைப்பு குறியீட்டுடன் இப்பதிப்பில் வெளியிட்டு இருப்பது என்பது குறிப்பிடத்தக்கதாகும். இதனை

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

பதிப்பிப்பதற்கு ப்ராக்ருத ப்ரபோத:* போன்ற பற்பல நூல்களின் ஆதாரத்தை கொண்டும், ப்ராக்ருத மொழியில் சிறந்த அனுபவம் பெற்ற வல்லுனர்களின் பார்வைக்கும் கொண்டுசெல்லப்பட்டு பதிப்பிக்கப்பட்டிருப்பது முக்கியத் துவம் வாய்ந்ததாகும். இந்நூலில் அதிக இடங்களில் ப்ராக்ருத மொழி காணப்படுவதால் அதற்கு சமஸ்க்ருத மொழிபெயர்ப்பு அத்தியாவசியமாக எடுத்துக் கொள்ளப்படுகிறது.

பதிப்பின் பயன்

தமிழகத்தில் சம்ஸ்க்ருத மொழியில் பல ரூபகங்கள்/ நாடகங்கள் கிடைப்பினும் தஞ்சையில் வசித்து தஞ்சை மாமன்னர்களைப் பற்றி நன்கு கருத்துக்களை அறிந்து தஞ்சையிலே இயற்றப்பட்ட இந்நாடக நூலை "தஞ்சை மகாராஜா சரபோஜி சரசுவதி மகால்" நூலகத்தில் பதிப்பித்து அச்சிட்டு வெளியிடுவது தஞ்சைவாசிகளுக்கும், தஞ்சை அருகாமையிலுள்ள அறிஞர்களுக்கும், ஏன்! உலகம் முழுவதற்குமே இன்றியமையாததாக இருக்கும். கல்லூரி மாணவர்களுக்கு இந்நாடகத்தினை பாடநூலாக அமைத்து உயர்ந்த பொருளைக்கொண்ட நாடகக் கலையால் இளமை உள்ளங்களை இன்புறச் செய்ய பல்கலைக் கழகங்கள் முயற்சித்து பயன்பெறலாம். இதில் நாடகச் சுருக்கம் தமிழில் உள்ளதால் படிப்போருக்கு சந்தேகங்கள் ஏற்படாமல் மிகவும் பயனுள்ளதாக இருக்கும்.

நன்றி நவிலல்

இந்நூலை பதிப்பிக்க ஆணை வழங்கிய மாவட்ட ஆட்சியர் மற்றும் இந்நூலக இயக்குநர் உயர்திரு முனைவர். எம். இராசாராம், இ. ஆ. ப., அவர்களுக்கும்,

---

* S. 3898 T. M. S. S. M. Library.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

இந்நூலக நிருவாக அலுவலர் திரு. சாமி. சிவஞானம். M.A., அவர்களுக்கும், நூலகர் மற்றும் வெளியீட்டு மேலாளர் திரு. அ. பஞ்சநாதன், M. A., M. L. I. S., அவர்களுக்கும், எனது மனமார்ந்த நன்றியை உரித்தாக்குகிறேன். இந்த நூலை நுண்ணாய்வு செய்து அச்சுக்குப் பரிந்துரை செய்த முனைவர். S. கோதண்டராமன், M.A., M.A. M.Ed. Ph.D., வ்யாகரண சிரோமணி, தஞ்சை ஓரியண்டல் உயர்நிலைப் பள்ளி முதுநிலை சம்ஸ்க்ருத பண்டிட், சரசுவதி மகால் நூலக சிறப்புக் கௌரவ பதிப்பாசிரியர் அவர்களுக்கும், ப்ராக்ருதத்திலிருந்து சமஸ்க்ருதத்தில் மாற்றிய பகுதியைச் சரிபார்த்து உதவிய T. S. அடையார் நூலக சமஸ்க்ருத பண்டிட். ராமச்சந்திர சர்மா அவர்களுக்கும், எனது நன்றியைத் தெரிவித்துக் கொள்கிறேன். இந்நூலைப் பதிப்பிக்கவும், எனது படிப்பிற்கும், உயர்வுக்கும் முக்கிய காரணமாகவும், எனக்கு எப்போதும் தூண்டுகோலாகவும் திகழும் என் அருமை சகோதரர் திரு. S சுதர்ஷன், M. A., B. L. I. S., சரசுவதி மகால் நூலகர் அவர்களுக்கும் எனது மனப்பூர்வமான நன்றியைத் தெரிவித்துக்கொள்கிறேன். அவ்வப்போது சிறந்த கருத்துக்களையும், சந்தேகங்களையும். நிவ்ருத்தி செய்த இந்நூலக சம்ஸ்க்ருத பண்டிட் திரு. N, ஸ்ரீநிவாஸன் அவர்களுக்கும். சம்ஸ்க்ருத பண்டிட் திரு. A. வீரராகவன் அவர்களுக்கும் மற்றும் சம்ஸ்க்ருதப் பிரிவு பண்டிதர்களுக்கும் எனது வினயத்தைத் தெரிவித்துக் கொள்கிறேன். இந்நாடக நூலினை நன்கு அச்சிட்டுத் தந்த இந்நூலக அச்சகப் பணியாளர்கள் அனைவருக்கும் எனது நன்றியை உரித்தாக்குகிறேன்.

மங்களானி பவந்து.

சென்னை
28—1—2000

S. முத்து பட்டர்

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

கதாஸங்க்ரஹம்

முதல் அங்கம்

மங்களம்–காமதேவனிடம் அன்பும் ரதியிடம் அருளும் நிரம்பப்பெற்ற அம்பாள் தேவியின் உலகைக் குளிர்விக்கும் கடாக்ஷத்தின் பெருமையைப் பேசுகிறது. (சூத்ரதாரன் ப்ரவேசம்)

சூத்ரதாரன், நடியிடம் தஞ்சையில் உள்ள மூவுலகத்திற்கும் தேவியான ஆனந்தவல்லியின் வசந்தோத்சவத்தில் பல தேசங்களிலிருந்தும் வந்துள்ள ரசிகர்கள் மற்றும் வித்வான்களின் மகிழ்ச்சிக்காக ஏதேனும் ஒரு ரூபகத்தை — நாடகத்தை நடத்தவேண்டுமென்ற தன் எண்ணத்தை வெளிப்படுத்துகிறார். தானே ஜகந்நாதர் எனும் கவி எழுதியுள்ள "ரதிமன்மதம்" எனும் நாடகத்தையும் நினைத்துக்கொள்கிறார். கவியின் வம்சம், குரு, புரவலர்களையும் குறிப்பிடுகிறார். வசந்த வர்ணனை செய்யப்படுகிறது. நடீ, மன்மதனுக்கும்–ரதிக்கும் உள்ள காதலைக் குறிப்பிடுப்படியாக சிலேஷையின் மூலம் வர்ணிக்கிறார். சூத்ரதாரன் அதை தெளிவாகக் கூறுகிறார் — "மந்திரியான வசந்தனால் (ஆலோசனை) பொறுப்பு ஏற்றுக்கொள்ளப்பட்டது. காதலில் மனதைக் கொடுத்து மன்மதன் இராகனின் மகளான ரதியிடம் ஈடுபட்டு நிற்கிறான்" என்று. (ப்ரஸ்தாவனை முற்றும்)

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

முந்திய நாள் மேல்மாடியில் பார்த்த ரதியின் நினைவாக விதூஷகனுடன் மன்மதன் உரையாடுகிறான். தன் காதலையும் வெளிப்படுத்துகிறான். நந்தனம் எனும் உபவனத்திற்குச் செல்லத் தூண்டுகிறான் விதூஷகன். இருவரும் செல்கின்றனர். ரதியும் வீதியில் பார்த்த மன்மதனையே நினைத்துக்கொண்டு அங்கிருக்கிறாள். நந்தனத்தில் மாமரத்திலிருந்து மாம்பழம் விழுகிற வியாஜத்தில் இருவரும் ஒருவரையொருவர் சந்திக்கின்றனர். அவர்களிடையே அறிமுகம் நிகழ்கிறது. அனைவரும் கூடிப்பேசிக்கொண்டு இருக்கும்போது பரிசாரிகை தாயின் கட்டளையை ரதிக்குத் தெரிவிக்கிறாள். பிரிவாற்றாமையுடன் ரதியும் தோழிகளுடன் செல்கிறாள். ரதியை அடையும் வழியை யோசிக்கும் மன்மதன் பரதேவதையின் நான்காவது ஆவரண அதிதேவதையான ஸர்வார்த்த ஸாதிகையையும், தன் மந்திரி வசந்தனையும் நினைத்துக் கொள்கிறான். மத்யான்ன நேரம் — மந்தாகினி நதியில் ஸ்நானம் செய்து மத்யான்ன கிரியைகளைச் செய்யச் செல்லுகிறான்.

இரண்டாவது அங்கம்

மயூரிகை சாரிகை எனும் இரு சேடிகள் மன்மதன் - ரதி காதலைப் பற்றிப் பேசுகிறார்கள். அவர்கள் திருமணத்தைப் பற்றியும் பேசுகின்றனர். (ப்ரவேசகம்) நீருற்று நிலையத்தில் தோழிகளால் சுசுரூஷை செய்யப்படுபவளாய் ரதி தோன்றுகிறாள். தன் காதலனைப் பிரிந்து அவனையே நினைத்து வாடுபவளாய்த் தோன்றுகிறாள். தோழிகள் அறிவுரைகளைக் கூறுவதை விடுத்து மேற்கொண்டு நடக்க வேண்டியதைக் கவனிக்கக் கூறுகிறாள். அவனை

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

(காதலனை/மன்மதனை) நேரில் காண்பது போன்ற உணர்வுடன் காதலனை நினைத்தவண்ணமிருக்கிறாள். தான் எழுதிய தன் காதலன் ஓவியத்தையும், அதை சாரிகை எங்கோ வைத்துவிட்டதையும் அறியாதவளாய் இருக்கிறாள்.

விதூஷகனுடன் கூடிய மன்மதன் உயரமான கட்டிடத்தின் சாளரத்தின் அருகில் இருப்பவனாகத் தோன்றுகிறான். ரதியின் அழகை வர்ணித்தவண்ணம் உள்ளான். அவனை ஓவியமாகத் தீட்ட கஞ்சுகியை ஓவியப்பலகை எடுத்துவரப் பணிகிறான். கஞ்சுகியும் ஏதோ ஓவியத்துடன் கூடிய துணியை எடுத்து வருகிறான். அதில் தன் உருவமே எழுதப்பட்டிருப்பது கண்டு திகைக்கிறான். கஞ்சுகியை அது பற்றி வினவ, அரசனின் உத்யானப் பாதுகாவலரிடமிருந்து பெறப்பட்டது என்று அறிகிறான். மேலும் அரசனான ராகனின் மகளின் வீட்டைப் பார்த்துக் கொள்ளும் சாரிகையால் தோட்டத்துப் பொய்கைக் கரையில் மறதியாக தவற விடப்பட்டது என்றும் பாதுகாவலர் கூறியதைக் கூறுகிறான். ரதி எழுதிய ஓவியம் அது என்று உணர்ந்து (மன்மதன் சித்திர பலகத்தில் தனது அருகில்) ரதியின் உருவத்தையும் அதில் வரைகிறான். மற்றொரு இடத்தில் ரதி தோழிகளுடன் மன்மதனை நினைத்து காதல் சுவையுடன் இருக்கிறாள், பகவதியின் யோக மஹிமையினால் ரதி-மன்மதனுக்கு காதல் நன்கு புலனாகாத போதிலும் ப்ரத்யக்ஷம் போல் தோன்றுகிறது. இருவரின் காதலும் வளர்கிறது.

வசினி (பகவதீ பரமேச்வரியின் அனுக்ரஹத் தோழி) ரதியின் பிரிவாற்றாமையால் வருந்தும் மன்மதனைத்

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

தேற்ற ஸர்வார்த்தஸாதிகை எனும் (தேவியின் ஆவரண தேவதைகளுள்) ஒருத்தியை அனுப்பி அவள் மன்மதன் வீட்டில் நுழைகிறாள். அவனைத் தேற்றி விதூஷகன் தவறவிட்ட ஓவியப் பலகையை ரதியிடம் ஒப்படைக்க எண்ணம் கொண்டுச் செல்லுகிறாள், மயூரிகை சித்ரபலகத்தை ரதியிடம் தருகிறாள். ரதியும் மன்மதன் வரைந்த தன்வடிவைக் கண்டு தேறுதலடைகிறாள். சாரிகை ரதியின் தாய் அங்கு வருவதை ரதியிடம் கூறுகிறாள்.

மூன்றாவது அங்கம்

தன் பொறுப்பால் கவலை நிறைந்த வசந்தகனின் ப்ரவேசம். அவன் வசினியின் மூலம் ரதி மன்மதனை மிகவும் விரும்புகிறாள் என்று தெரிந்தது. உபேந்த்ரனால் அனுப்பப்பட்ட வாசஸ்பதியின் மூலம் மன்மதனுக்கு ரதி நிச்சயிக்கப்பட்டு இருக்கிறாள் என்று அவள் பெற்றோர் மூலம் மன்மதனுக்குத் தெரிவிக்கப்பட்டுள்ளது. ஆனால் ஒற்றர்கள் சம்பராசுரனுக்கு ரதியைக் கேட்டு பார்க்கவரின் சிஷ்யரான பாஷ்கலர் அவள் பெற்றோரிடம் வந்தார் என்ற ஆபத்தான கருத்தையும் தெரிவித்துள்ளனர். ரதியின் பெற்றோரால் அழகுள்ளவனாயும், கன்னிகையின் (ரதி) மனதிற்கு பிடித்த வரனே தேவை என்று மறுப்பு தெரிவிக்கப்பட்டவுடன் மனமின்றி உடைந்த மனதுடன் சம்பராசுரனின் ஒற்றர் பாஷ்கலர் திரும்பச் சென்றார் என்று கேள்வி. இதன் நடுவே சூரபத்மன் போன்ற அசுரர்களால் தோற்கடிக்கப்பட்ட இந்திரன் சிவனின் மைந்தனாலேயே அவனுக்கு அழிவு ஏற்படும் என்று உணர்ந்து பனிமலையில் தவம் புரியும் சிவனின் தவத்தைக் கலைத்து அவரை

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

பார்வதியுடன் சேர்த்து வைக்கும் பொறுப்பை மன்மத னிடம் ஒப்படைக்க இந்நாட்களில் மன்மதனிடம் மிகுந்த அன்பையும் பரிவையும் காட்டுகிறான். தலைவனுக்கே பரதேவதையின் அருள் இருக்கட்டும் ஆதனால் நலம் கூடும் என்கிறான். கஞ்சுகி நுழைந்து "இந்திரனால் அழைக்கப்பட்ட தலைவர் தங்களைக் காண விழைகிறார்" என்கிறான். பின்பு கஞ்சுகியுடன் வசந்தன் செல்கிறான். (வசந்தனும் மன்மதனும் ப்ரவேசம்) மன்மதன் ஒரு புறம் தனக்கும் ரதிக்கும் திருமணப் பேச்சு; மறுபுறம் மிகவும் அத்யாவச்யமான தேவகார்யம் என்று இரண்டு முக்கிய மான செயல்களுக்கிடையே தன் மனம் ஊசலாடுகிறது" என்கிறான். இருவரும் இந்திரனின் மாளிகைக்குச் செல்லு கின்றனர். (தேவர்களுடன் கூடிய இந்திரனின் பிரவேசம்) வாசஸ்பதி உரையாடுகிறார். இந்திரன் மன்மதனிடம் "சிவபார்வதிக்கு பிறக்கும் குழந்தையால்தான் தேவர்களின் சத்ருக்கள் அழிவார்கள். ஆக எவ்விதம் அவர்கள் ஒரு கணமேனும் பிரிந்திருக்க இயலாதவர்கள் ஆவாரோ அவ்விதம் முயலவேண்டும்" என்கிறான். அம்முயற்சியில் மன்மதனின் ஈடுபாட்டைக் கண்ட இந்திரன், அவனுக்குத் திவ்ய வஸ்திரங்களையும், ஆபரணங்களையும் தந்தான். மன்மதன் வஸந்தனுடன் செல்கிறான். மன்மதனைப் பற்றிய தகவல்களைத் தனக்குத்தர ஒற்றர்களை இந்திரன் ஏவுகிறான். ஸ்தாண்வாச்ரமத்தை மன்மதன் அடைந்ததை அறிந்த இந்திரன் அவர்களை ஓய்வெடுக்க அனுப்பி விடுகிறான்.

இதன் நடுவே கஞ்சுகி மிகவும் உக்கிரமான அக்னி வெளிப்பட்டதாகக் கூறுகிறான். அவ்வக்னி பகவானின் நெற்றிக் கண்ணிலிருந்து வெளிப்பட்டதை அறிந்து, இந்திரன் கலக்கமுற்றான். வாசஸ்பதி அவனைத் தேற்று

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

கிறான். அம்ருதேச்வரியால் அவ்வக்னி தன்னிடத்திற்கு எடுத்துச் செல்லப்பட்டதை அறிந்து மகிழ்வுறுகிறான். பிறகு ஒற்றர்கள் மன்மதனின் வெற்றியைப் பறைசாற்று சாற்றுகின்றனர். வஸந்தன் வாசஸ்பதிக்குக் கொடுத்த கடிதத்தை ஒற்றர்கள் மூலம் பெறுகிறார். வாசஸ்பதி, ஒற்றர்கள் தேவி பார்வதி கருவுற்றிருப்பதை அறிவிக் கின்றனர்.

கார்த்திகேயனின் பிறப்பு அறிவிக்கப்படுகிறது. கார்த்திகேயன் தேவசேனைக்குத் தலைவனாக நியமிக்கப் பட்டவுடன் இந்திரன் தனக்கு எதிரிகளிடமிருந்து பயம் இல்லை என்று மகிழ்கிறான். அதைக் கொண்டாட ஆணை இடுகிறான். இதன் நடுவே வாயிற்காப்போன், "ராகனின் மகள் (ரதி) வீட்டில் தூங்கிக்கொண்டிருக்கும்போதோ யாரோ மாயாவியால் தூக்கிச் செல்லப்பட்டுவிட்டாள். அவளைக் காணவில்லை" என்று கூறுகிறான். வாசஸ்பதி "ரதியை அடைய மன்மதனுடன் போட்டியிட்ட சம்பரனின் வேலையாக இருக்கவேண்டும்" என்று ஊகிக்கிறார். கோபமடைந்த இந்திரன் சேனையைத் திரட்ட உத்திரவு இடுகிறான். ராகனையும் தேற்றதகுந்தோரை அனுப்பு கிறான். இதனிடையே வாசஸ்பதி "சம்பரனின் வதம் குறித்து மன்மதன் சபதமேற்றுள்ளதால் இப்பெருமையை குமாரனே அடையவேண்டும்" என்கிறார். இந்திரனும் அதை ஏற்று அசுரர்களைத் தாக்கி எதிரியின் பலத்தைக் குறைத்து மன்மதனுக்கு உதவத் தீர்மானிக்கிறான்.

நான்காவது அங்கம்

(இராகன், முதிதை (ரதியின் தாய்), இரு தோழிகள் புரோஹிதரின் பிரவேசம்) அனைவரும் அபகரிக்கப்பட்ட

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ரதியைக் குறித்து வருந்துகின்றனர். ஒற்றன் அங்கு தோன்றி "ரதியைத் தன் தேரில் ஏற்றிச் செல்லும் சம்பரனை துரத்திக்கொண்டு மஹேந்திரன் — இந்திரன் செல்லும்போது சூரபத்மன், ஸிம்ஹமுகன், தாரகன் முதலியோர் மிகப்பெரும் படையுடன் இந்திரனைத் தடுத்தனர். அப்போது பகவான் கார்த்திகேயன் அங்கு தோன்றினார். பிறகு ஏற்பட்ட போரில் அனைத்து அசுரர்களும் கொல்லப்பட்டனர்" என்றான். ரதியைப் பற்றிக் கேட்டபோது வேகமான தேரில் வெகுதூரம் சென்ற அவள் எங்கு சென்றாள் எனத் தெரியவில்லை என்று சொன்னவிடுகிறான்.

மயூரிகா கவலையுடன் இருக்கும் அனைவரையும் அணுகி, "வசினி தேவதையால் பகவதியின் யோகமஹிமையால் மாயாவதீ என்ற இளவரசி போன்ற பெண் படைக்கப் பட்டு சம்பரனின் தேரில் இளவரசியினிடத்தில் அமர்த்தப் பட்டாள். அதனால் இளவரசி காப்பாற்றப்பட்டுவிட்டாள் என்று கூறினாள், பகவானின் அனுக்ரஹம் பெற்று மன்மதனும் வருவான் என்கிறான். அனைவரும் ஸ்ரீமாதா (ஸிம்ஹாஸனேச்வரியாக விளங்கும் ஜகன்மாதா திரிபுரசுந்தரியிடம்) செல்ல அவ்விடத்தை விட்டுச் செல்ல அவ்விடத்தை விட்டுச் செல்கின்றனர்.

சாரதியுடன் தோன்றிய மன்மதன் ரதியைப் பற்றி கவலையுறுகிறான். கோகிலகன் ரதி கவர்ந்து செல்லப் பட்டதைக் கூறுகிறான். மன்மதன் மயக்கமடைய கோகிலகன் அவனை தேளிவிக்கிறான். பிறகு அசுரனைக் கொல்ல முனைந்து அவனிருக்குமிடம் செல்கிறான்.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

(சம்பரன் ரதத்துடன் பிரவேசம்) மன்மதன் அதில் இருக்கும் பெண்ணைப் பார்த்து துன்புறுகிறான். சம்பரனைச் சாடுகிறான். (தீயச் சொற்களால் பேசுகிறான்) பிறகு இருவரும் போர்புரிய போர்க்களம் புகுகின்றனர். தன் சிஷ்யனுடன் அங்கு வந்த நாரதர் வர்ணிப்பதன் மூலம் போர் விவரிக்கப்படுகிறது. மன்மதன் சம்பரனை வென்ற அளவில் இருவரும் இந்திரன் உபேந்திரர்களுக்குச் செய்தியைக் கூற விரைகின்றனர்.

ஐந்தாவது அங்கம்

வெற்றிபெற்ற மன்மதன் மாயாவதியுடன் பிரவேசிக்கிறான். மாயாவதீ பயந்தவள் போல் நிற்கிறாள். மன்மதன் அவளைப் பார்த்து சந்தேகப் படுகிறான். அவன் ராகனின் மாளிகையை அடைகிறான். அவன் ராகனின் மாளிகையை அடைகிறான். அங்கு வசினீ, ஸர்வார்த்த ஸாதிகை, தோழகள், ரதி மற்றும் அவளின் பெற்றோர் அனைவரும் இணைகின்றனர். ரதியைக் கண்டு மன்மதன் தன் மனதில் தோன்றிய ஐயத்தை அவளிடம் கூறுகிறான். ரதியும் மாயாவதியைக் கண்டு கண் இமைக்காமல் நிற்கிறான். மாயாவதியும் ரதியைப் பார்த்து வியப்புறுகிறான். ஸர்வார்த்தஸாதிகை, முதிதை – ராகனைப் பார்த்து (ரதியின் தகப்பனை பார்த்து) "இவன் மாயாவதீ அசுரனிடமிருந்து ரதியை காப்பாற்ற யோகமாயையால் நிர்மாணிக்கப்பட்டுள்ளாள். உங்கள் மகள் போன்றவளே" என கூற அனைவரும் அவளை ஏற்கின்றனர்.

பிறிதொருபக்கம் கார்த்திகேயனுக்குத் தேவசேனை இந்திரசேனையுடன் விவாஹம் நடக்க உள்ளது.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

அவ்விதமே மன்மதனுக்கு ரதி—மாயாவதிகளின் விவாஹங்களும் நடக்கிறது. விவாஹத்திற்குப் பின் மன்மதன் ஸர்வார்த்தஸாதிகையை வணங்குகிறான். அவளும் மாதா ஸ்ரீஸிம்ஹாஸனேச்வரியின் கட்டளையைக் கூறுகிறாள் — "மன்மதனின் திருமணம் நிறைவேறியதும் அவனுக்குத் தரிசனம் அளிப்பேன்" என்பது. உடனே ஸர்வார்த்தஸாதிகை இரு மனைவியுடன் கூடிய மன்மதனை தேவி த்ரிபுரஸுந்தரியின் கோவிலுக்கு அழைத்துவருகிறாள். அங்கு தேவி தகுந்த பரிவாரங்களுடன் ஸிம்மாஸனத்தில் தோன்றுகிறாள். அக்காட்சியைப் பார்த்து காமேச்வரனின் மடியை அலங்கரிப்பவளாக மன்மதன் ஸ்ரீமாதாவைத் துதிக்கிறான். மன்மதன் லோகமாதாவிடம் உலகக் காமனைகளை நிறைவேற்றக்கோரும் பரத வாக்யத்துடன் நாடகம் இனிதே நிறைவேறுகிறது.

மங்களானி பவந்து.

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

இந்த நாடகத்தில் இடம்பெறும்
கதாபாத்திரங்கள்

ஆண்கள்

சூத்ரதாரன்	—	நாடகத்தயாரிப்பாளர்/இயக்குநர்
மன்மதன்	—	கதாநாயகன், மகேந்திரனின் தம்பியின் மைந்தன், உபேந்திரனின் மகன்.
விதூஷகன்	—	மன்மதனின் (கதாநாயகனின்) நண்பன், ஸாங்க்யாயனன் என்ற பெயரினன்,
தலைமைக்காவலன் (கஞ்சுகீ)	—	நாயகனைத் தொடர்ந்து செல்லுபவன்
வசந்தன்	—	நாயகனின் ஆலோசகன்
மகேந்திரன்	—	தேவராஜன் இந்திரன்
வாசஸ்பதி	—	தேவர்கள் குரு
ஜாங்கிகெள	—	செய்தி எடுத்துச் செல்பவர்கள்
வாயிற்காப்போன் (தௌவாரிகன்)	—	மகேந்திரனின் அரண்மனை வாயிற்காவலன்
ராகன் (ஆசை)	—	ரதியின் (கதாநாயகியின்) தந்தை
சாரணன் (ஒற்றன்)	—	இளவரசன் ஜயந்தனுக்கு செய்தி எடுத்துச் செல்பவன்
கோகிலகன்	—	செய்தி எடுத்துச் செல்பவன்
சாரதி(தேரோட்டி)	—	(நாயகன்) மன்மதனுக்கு தேரோட்டுபவன்
சம்பரன்	—	சம்பரன் என்ற பெயருடைய அரசன்
வாயிற்காவலன் (ப்ரதீகாரீ)	—	மகேந்திரனுக்கு ஒற்றன்

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

நாரதர்	—	கலகம் விளைவிக்க ஆசையுடைய முனிவர்
சிஷ்யன்	—	நாரத முனிவரின் சிஷ்யன்

பெண்கள்

நடீ	—	சூத்ரதாரனின் மனைவி
ரதி	—	ராகன் (ஆசை) மற்றும் (முதிதை) த்ருப்தியின் மகள்
கிளிமொழியாள் (கீரவாணீ)	—	ரதியின் (கதாநாயகியின்) தோழி
குயிற்குரலாள் (கோகிலவாணீ)	—	ரதியின் (கதாநாயகியின்) தோழி
பணியாள் (பரிசாரிகை)	—	ரதியின் மாளிகையில் பணியாற்றுபவள்
ஸாரிகை	—	ராகன் மகளின் வீட்டு பணியாளர்
மயூரிகா	—	ராகன் மகளின் வீட்டு பணியாளர்
ஸ்ரீமாதா	—	ஸிம்மாஸனேச்வரியாக விளங்கும் ஜகன்மாதா திரிபுரசுந்தரீ
ஸர்வார்த்தஸாதிகை	—	தேவியின் ஆவரண தேவதைகளுள் ஒருத்தி
முதிதை	—	ரதியின் தாய்
மாயாவதீ	—	ரதியின் வேறுவடிவம்

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

OUR NEW PUBLICATIONS

1.	Nauka Charitram	Sanskrit & Tamil	30-00
2.	Sita Kalyanam	,, ,,	35-00
3.	Sirungarakosam	Sanskrit	12-00
4.	Vedasara Sahasram	Sanskrit	80-00
5.	Sri Vaikhanasam	,,	27-00
6.	Stotra Ramayanam	,,	25-00
7.	Mukunda Vilasam	,,	35-00
8.	Vinatananda Vyayoga	,,	40-00
9.	Gayatri Kosam	Sanskrit & Tamil	20-00
10.	Jataka Chandrikai	,, ,,	30-00
11.	Ragaratnakaram	,, ,,	15-00
12.	Kumaresa Satakam	Tamil	65—00
13.	Lokaswarupam	,,	75—00
14.	Silparatnam	,,	150—00
15.	Kanakkathikaram	,,	150—00
16.	Vaidya Chintamani	,,	25—00
17.	Thiruvappanur Puranam	,,	50—00
18.	Sowmiya Sakaram	,,	70—00
19.	Marathi Lavani Songs	Marathi	35—00
20.	Anandakandam	Tamil	100—00
21.	Thanjavur Nayakkar Varalaru	,,	205—00
22.	Viruthararatnavali	Sanskrit & Tamil	25—00
23.	Vimanarchanakalpam	,,	40—00
24.	Suriya Satakam	,,	50—00
25.	Kandukapura Mahatmyam	,,	25—00
26.	Sanskrit Padas	,,	20—00
27.	Sulinikalpam	Sanskrit	50—00
28.	Thiruthala Padangal	Telugu	30—00

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ श्रीः ॥

॥ श्रीमद्विखनसमहागुरवे नमः ॥

जगन्नाथपण्डितेन विरचितं

॥ रतिमन्मथम् ॥

॥ प्रथमोऽङ्कः ॥

साकूताश्शशिशेखरे सुरसरित्याविष्कृतानादराः
स्मेराभृङ्गिरिटावनन्यशरणे दीने दयामेदुराः ।
वात्सल्यप्रचुराःप्रसूनविशिखे रत्यां प्रसादोत्तराः
कल्याणानि तरङ्गयन्तु जगतां मातुःकटाक्षाङ्कुराः ॥ १

(नान्द्यन्ते)

सूत्रधारः – (नेपथ्याभिमुखमवलोक्य) आर्ये, सन्निधेहि तावत् ।

(प्रविश्य)

नटी – अज्ज, एसम्हि णिओअणिज्जा ।
(आर्य, एषाऽस्मि नियोजनीया ।)

सूत्रधारः – आर्ये, नन्वस्यास्तञ्जानगरकञ्जातकलहंससुदृशो भावुकजन-भावुकवितरणकल्पवल्यास्त्रिलोकमातुरानन्दवल्यास्तावद् वसन्तोत्सवे ससन्तोषमशेषदिगन्तोपमेदुषाममीषां रसिक-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

विदुषामनुरञ्जनानुरूपं किमिव रूपकमिति निरूपयतोऽपि चिराय न विश्राम्यति मे चेतः ।

नटी – अज्ज, संतेसु वि स अललो अहि अआणंदणधुरंधरेसु विविहेसु णिवंधणेसु किंति पज्जाउलं अज्जस्स माणसम्?
(आर्य, सत्स्वपि सकललोकहृदयानन्दनधुरन्धरेषु विविधेषु निबन्धनेषु किमिति पर्याकुलमार्यस्य मानसम् ?)

सूत्रधारः – आर्ये, शृणु तावत् —

शब्दाडम्बररसस्पृहाः कतिपये केऽप्यर्थचित्रैषिणः
केचित्तद्द्वितयोत्सुका वशयितुं शक्याः प्रवाचाह्यमी ।
ये तावद्रसिका रसोत्तरगुणग्रामाभिरामां परं
श्लाघन्ते भणितिं भवेन्न सुकरं तेषां समाराधनम् ॥ २

किञ्च,

नवनवसुदृग्विलासैर्ननूत्सुकाः कामिनो यथाऽनुदिनम् ।
एवमपूर्वासु कृतिष्वादरवन्तो हि रसयितारः ॥ ३

नटी – (सचिन्तम्) - किं णाम तारिसं होवु ?
(किं नाम तादृशं भवतु ?)

सूत्रधारः – (स्मृतिमभिनीय, सानन्दम्) हन्त, निजनाभिगतमेव सौरभमविज्ञाय परितो मृगयमाणस्य तदुद्भवं मृगनाभिमृगस्य पदवीमदवीयसीं कृतवतो मे नैपुण्यम् । यदत्र कण्ठवर्तिन्यपि सुवर्णाभरणे निकिलगुणशृङ्गाटके रतिमन्मथनाम्नि नाटकेऽन्यतो गवेष्यते ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

नटी – (सकौतुकम्) - कहेदु अज्जो कस्स कइणो ईरिसं वा
आविलसिदत्ति ?
(कथयत्वार्यः, कस्य कवेरीदृशं वाग्विलसितमिति ?)

सूत्रधारः – (सपरितोषम्) आर्ये, दीयतामवधानम् ।

अन्येन्द्रं जगदस्थितेन्द्रमपि वा कर्तुं प्रगल्भेऽन्वये
सम्भूतो ननु बालकृष्णसचिवोत्तंसस्य रूपान्तरम् ।
लक्ष्म्यम्बाहृदयाब्धिशीतकिरणो लोकेऽभिगम्यः सता-
मस्ति न्यस्तपदो गुणैरिह जगन्नाथाभिधानः कविः ॥ ४

नटी – (सगौरवम्) अज्ज, तह महाकुलीणो णं एसो ।
(आर्य, तथा महाकुलीनो नन्वेषः ।)

सूत्रधारः – अथ किम् !

नटी – अज्ज, मुणामि से देसिएहिं वि महप्पेहिं होदव्वम् ।
(आर्य, जानामि तस्य देशिकैरपि माहात्म्यैः भवितव्यम् ।)

सूत्रधारः – (सश्लाघम्) आर्ये, निपुणमुपन्यस्तम् ।

जिह्वारङ्गस्थवाणीनखविहृतिरणद्वल्लकीनादभेदै-
र्दृग्लीलाधीनलक्ष्मीकरकमलमधुस्वादिमाद्वैतवादैः ।
चेतः क्रीडन्मृडानीकचभरकलितामन्दमन्दारगन्धः
प्रख्यामोदैर्वचोभिः सुरभिरिह गुरुः सैष कामेश्वरोऽस्य ॥ ५

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

नटी – (सशिरः कम्पम्) अज्ज, कदरस्स रण्णो अण्णाधुरीणो एसो ? (आर्य, कतरस्य राज्ञ आज्ञाधुरीण एषः ?)

सूत्रधारः – (सुबहुमानम्)

अस्त्याधारधुरन्धरः स्वशरणायातस्य नीरन्ध्रता
दुर्भेदो मधुपव्रजेन गुणवन्नित्योपजीव्योच्छ्रयः ।
वंशो भोसलभूभृतोऽधिवसुधं चोलप्रदेशार्पित-
स्फूर्जन्निर्मलकीर्तिमौक्तिकमणी हारात्मकालङ्कृतिः ॥ ६

तस्मिन् - विस्मयनीयशीलसदनं संग्रामलीलातति-
ज्याचक्रीकृतचापदर्शननमत्प्रत्यर्थिपृथ्वीपतिः ।
अश्रान्तप्रतिपादनामृतझरीनिर्वापितार्थिव्रजा-
किञ्चन्योद्धुरसंज्वरो भुवि जयत्येकावनीचन्द्रमाः ॥ ७

स तावद् राजशिरोमणिरुपजीव्यते तेन जगता च सर्वेण ।

नटी – (सवितर्कम्) - अज्ज, अण्णं दाव जाणिदव्वं अत्थि मे, जं किल स अलकलाकलावमंडिदा वि एसा पण्डिद-मण्डली कहं अम्हेहिं परितोसणिज्जति । (आर्य, अन्यत् तावज्ज्ञातव्यमस्ति मे, यत्किल सकलकला-कलापमण्डिताप्येषा पण्डितमण्डली कथमस्माभिः परितोषणीयेति ।)

सूत्रधारः – आर्ये, कृतमाशङ्कया । इयमेव महतां शैली, यदन्य-दीयस्यगुणपरमाणोरपि पर्वतीकरणम् । प्रतीपा पुनरन्येषाम् । पश्य, —

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

धारा अपि धाराधरगलिता अब्धन्यभावमुपयान्ति ।
रत्नाकरे तु दधतेऽदभ्रा अपि विप्रुषो मणीरूपम् ॥ ८

नटी – (सहर्षसम्भ्रमम्) - अज्ज, संपण्णाए वि एरिसीए सामग्गीए किंति सभाअणसभाअणे विलंबीअदि ? (आर्य, सम्पन्नायामपीदृशि सामग्र्यां किमिति सभाजनसभाजने विलम्ब्यते ?)

सूत्रधारः – आर्ये, तदिममेव सन्निहितमुल्लसन्तं सुमनः सम्पदा वसन्तं विषयीकृत्य सङ्गीतिरङ्गीक्रियताम् । अधुना हि,

कीराणामुदितं कलैः पिकमुखात् प्रोदञ्चितं पञ्चमैः-
स्वैरं चन्दनशैलकन्दरभवैर्मन्दानिलैः स्पन्दितम् ।
सङ्घर्षादिव पुष्पितं क्षितिरुहैर्भाग्यैःसमुन्मीलितं
भृङ्गाणाञ्च तथा मनोरथशतैर्यूनामनूनायितम् ॥ ९

नटी – (तह त्ति) गायति
एदस्सिं णिहिदभरो सइवे कुसुमाअरे विहु मअणो ।
सुअरत्तिलोलविअअव्वावारो रइपरो जअइ ॥
तथा इति,

(एतस्मिन्निहितभरः सचिवे कुसुमाकरेऽपि खलु मदनः ।
सुकरत्रिलोकविजयव्यापारो रतिपरो जयति ॥) १०

सूत्रधारः – (साभिनन्दनम्) आर्ये, सुश्लिष्टमिदमविगीतं तव गीतं, यदत्र मन्त्रिणा वसन्तेनोदूढकर्तव्यभूयिष्ठधुरतया लघूकृत-

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

स्वव्यापारभरो मन्मथो निरन्तरं सुखपरश्च तत्र भवतो रागस्य दुहितरी रत्याश्च तत्पर इति द्वेधा सूचितमभिधेयम् । तन्नियोजय नचिरात्तत्तद्भूमिकापरिग्रहाय सकलं शैलूषजनम् । अहमेव सह मारिषेण सनर्मसचिवस्य मन्मथस्य समाददे नैपथ्यम् । आर्योऽपि रत्याः ।

नटी – जं आणवेइ अज्जो । (यदाज्ञापयत्यार्यः ।)

(इति निष्क्रान्ता)

सूत्रधारः – एषोऽस्मि मन्मथः सम्पन्नः ।

(प्रविश्य)

नटः – अहमपि विदूषकः ।

॥ प्रस्तावना ॥

मन्मथः – (परिवृत्त्य विदूषकेण सहासनोपविष्टः, सोत्कण्ठमात्मगतं)

रथ्यायां चरता मया सकुतुकं हृद्यःसौधमासेदुषी
दृष्टा स्थेमवतीव विद्युदपरिभ्रंशेव तारा दिवः ।
मृद्वी हेमलतेव लोलनयना काऽप्यङ्कुरद्यौवना
यस्याः प्रेक्षितविभ्रमैर्वृतिरे स्मेरोत्पलिन्यो दिशः ॥ ११

(इति पारवश्यं नाटयति)

विदूषकः – व अस्स, अहिग अपरमत्थपुट्ठो विअ किं वि पज्झाअंतो दीसेइ भवं ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

(वयस्य, अधिगतपरमार्थसुख इव किमपि प्रध्यायन् दृश्यते भवान् ।)

मन्मथः – (अनाकर्णितकेन स्वगतं पुनस्तदेवाम्रेडयति)

विदूषकः – (आत्मगतम्) अम्हो मए बहिरस्स कण्णे गीदं । (अहो मया बधिरस्य कर्णे गीतम् ।) (मन्मथं हस्तेन चालयन् ।)

(प्रकाशम) वअस्स, किं रण्णचंदिमा मह झरइ ? (वयस्य, किमरण्यचन्द्रिका मह: क्षरति ?)

मन्मथः – (आकर्ण्य) सखे, किमाह भवान् ?

विदूषकः – व अस्स, कुदो एत्ति अं दाणिं तुह चिंताकालणं ? (वयस्य, कुत एतावदिदानीं तव चिन्ताकारणम् ?)

मन्मथः – सखे ! सांख्यायन ! तवापि किमकथनीयं नाम । (रथ्यायामित्यादि पूर्वोक्तं पठति)

विदूषकः – (स्वगतम्) अणुविहिज्जंतो हि एसो मं चेअ आआसइस्सइ, ता एव्वं उवक्कमामि । (अनुविधीयमानो ह्येष मामेवायासयिष्यति । तदेवमुपक्रमामि ।)

(प्रकाशम्) (साक्षेपम्) वअस्स सअलभुअणव्वामोहआरिणो तुह वि संविमोह इत्तिआ इत्थिअ त्ति मिच्छा दाव एदं । (वयस्य, सकलभुवनव्यामोहकारिणस्तवापि सम्मोहः, एतावत् स्त्रिया इति मिथ्या तावदेतत् ।)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मन्मथः – सखे! मैवम् ।

कामं सन्ति जगत्त्रये मृगदृशो यासां विलासाद्भुतै-
रुन्माद्यन्ति तपस्विनोऽपि नियमानुत्सृज्य नैषा तु ताः ।
केनासौ निरमायि वा कृशतनुर्यन्नेत्रपद्मश्चल-
स्पन्दादेव हि मन्मथस्य जनितो मे मन्मथोऽन्यो हृदि ॥ १२

विदूषकः – (सहासम्) - वअस्स, कामुअस्स अप्पा हि मदेव्वअवला अच्चरत्ति? आभाणओ लोअस्स ।

(वयस्य, कामुकस्यात्मा .... इति आभाणको लोकस्य।)

मन्मथः – सखे, किं मां मृषावादिनाशङ्कसे ?

विदूषकः – वअस्स, होदु णाम सच्चवअणो भवं । णअरसोहग्गविलो-अणकोदूहलेण सोहग्गादो परिदो दिण्णदिट्ठीए ताए णाअरमहिलाए सह अप्पउत्ताणं वि पेक्खिदविब्भमाणं अप्पाणं चिअ गोअरं संभाविअ किं ति एद्दहं संतप्पसि?

(वयस्य, भवतु नाम सत्यवचनो भवान् । नगरसौभाग्य-विलोकनकौतूहलेन सौधाग्रात् परितो दत्तदृष्ट्या तया नागरमहिलया सह....मपि प्रेक्षितविभ्रमाणामात्मानं चैव गोचरं सम्भाव्य किमित्येतावत् सन्तप्यसि?)

मन्मथः – अये यथाजात, किं मां ग्रामीणमवगच्छसि?
निशमय तावत् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सामन्यत्र वलद्दृशं मृदुतनुः स्वैरं लुलोके रमा-
न्मय्यालोकनसस्पृहे तु विदधे सङ्कोचलीलां दृशोः
सा सख्यन्तरिताऽभवत् सविधगेवाहस्य धारावशा-
च्चक्रे दूरगते च सौधमुदयच्चन्द्रं समुत्कन्धरा ॥ १२

विदूषकः — वअस्स, एव्वं विअविण्णादकुलसीलाए संसइदपाणिग्गहविहीए परवदीए तीए दिट्ठमेत्त एव्व का णाम तुज्झ पच्चासा ? (वयस्य, एवमप्यविज्ञातकुलशीलायाः संशयितपाणिग्रहविधेः परवत्यास्तस्या दृष्टमात्र एव का नाम तव प्रत्याशा ?)

मन्मथः — अत एव सन्तप्यते ।

विदूषकः — वअस्स, किदं संदावेण । अहं तीए अहिजादाए संमाणइस्सं वअस्सं । (वयस्य, कृतं सन्तापेन । अहं तयाऽभिजातया संमानयिष्यामि वयस्यम् ।)

मन्मथः – (सस्पृहम्) सखे, कथमिव ?

विदूषकः – वअस्स, परिणिट्ठिदो म्हि खु अट्ठसु वि जोतिससिज्झंतेसु । आदो सअलेहि वि णाअरिएहि तेसु तेसु अब्भुअअकज्जेसु अवस्सपुच्छिदव्वस्स मह सुअरा दाव घडिदसव्वस्स लाहकहणेण तुम्हाणं दोण्णं वि अण्णुग्णसंघडणा । (वयस्य, परिनिष्ठितोऽस्मि खल्वष्टस्वपि ज्योतिषसिद्धान्तेषु । आदौ सकलैरपि नागरिकैस्तेषु

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तेष्वभ्युदयकार्येष्ववश्यप्रष्टव्यस्य मम सुकरा तावत् घटितसर्वस्य लाभकथनेन युवयोर्द्वयोरप्यन्योन्यसङ्घटना ।)

मन्मथः – (विहस्य, स्वगतम्) अलङ्कारोऽयमीदृशानां यदसम्बद्धव्यवहारितेति । (प्रकाशम्) सखे ! जानामि ननु तव नैपुण्यम् । कथय ! तावत्, अपि कश्चिदस्त्युपायस्तस्या हृदयङ्गमायाः सविशेषदर्शने ?

विदूषकः – (सोत्प्रासम्) व अस्स, मह वि कालन्त अदंसणच्छइल्लस्स बम्हणस्स किं णाम अविण्णादव्वं अत्थि । (वयस्य, ममापि कालत्रय दर्शन विदग्धस्य ब्राह्मणस्य किं नामाविज्ञातव्यमस्ति ।) (इति ध्यायन्निव तूर्ष्णीं क्षणमवस्थाय) व अस्स, दिट्ठो खु मए तुह हि अ अ वल्लहाए दंसण जोओ । (वयस्य, दृष्टः खलु मया तव हृदयवल्लभाया दर्शनयोगः ।)

मन्मथः — सखे, कीदृशोऽसौ ?

विदूषकः — वअस्स, मए दाव दिअहविसेसेसु समिक्कुसाहलणकालणादो इदो सण्णिहिदस्स एव्व णंदणुज्जाणस्सपेरंते पडिब्भमंतेण तत्थ जदिच्छ्राए मिलिअ कीलंतीओ अण्णुण्णसरिसीओ णाअरकण्णआओ पेक्खी अंदि । तक्केमि कदाइ सा वि अहि जादा आअच्छंती होज्जह । (वयस्य, मया तावद् दिवसविशेषेषु समित्कुशाहरणकारणात् इतः

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सन्निहितस्यैव नन्दनोद्यानस्य पर्यन्ते परिभ्रमता तत्र यदृच्छया मिलित्वा क्रीडन्त्योरन्योन्यसादृश्यो नागरकन्यकाः प्रेक्ष्यन्ते । तर्कयामि कदापि साऽप्यभिजाताऽऽगच्छन्ती भवेत् ।)

मन्मथः — (सौत्सुक्यम्) सखे, समुत्पादितकुतूहलोऽस्म्येवंवादिना भवता नन्दनोद्यानगमनाय । (इति करलालितशुको घुटिकाधनुरादायोत्तिष्ठन् विदूषकं प्रति) सखे, गच्छाग्रतः ।

विदूषकः — (स्वगतम्) कीलुप्पाडिणा कीसेण विअ सअ एव्व मए संपादिओ एसो अणत्थो । का गई । (प्रकाशम्) इदो इदो वअस्सो । (कीलोत्पाटिना कीशेनेव स्वयमेव मया सम्पादित एषोऽनर्थः । का गतिः ।) (इतो इतो वयस्य ।)

(इत्युभौ परिक्रामतः)

मन्मथः — (पुरतो वितीर्णचक्षुः) सखे, पश्य तावदस्यारामस्य रामणीयकम् ।

कुन्दैरङ्कुरितं नवैर्विहसितं लोध्रैरिवोत्केसरै-
र्वासन्तीभिरुदञ्चितं वहलितं यत्पाटलाभिस्तथा ।
नीपैर्मेदुरितं भ्रमन्मधुकरैरम्भोरुहैर्जृम्भितं
सङ्केतस्थलमित्यवैमि तदिदं षण्णामृतूनामपि ॥ १४

(इति पक्षद्वारेण नन्दनवन प्रवेशं नाटयित्वा सर्वतो निरूपयन्) अहो मन्दारप्रभृतीनां महाभाग्यम् ।

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सिन्धोर्जन्म सुरेन्द्रधाम्नि वसतिर्लक्ष्मीः स्वयं सोदरा
रूपं त्वद्भुतसर्वरत्नसुभगं पीयूषगर्भं फलम् ।
एतेषां सुरशाखिनां ननु सखे काऽन्या स्तुतिः स्यादतो
यल्लोके यदुपज्ञमेव महतामौदार्यधुर्यं यशः ॥ १५

अपि तावदमी समीहितदानशौण्डा मनोरथं मे पूरयिष्यन्ति ।

विदूषकः – मह वि णाम हिअअप्पमोदएहि मोदएहि । (ममापि नाम हृदयप्रमोदकैर्मोदकैः ।)

मन्मथः – सखे,

इतो मुखरिता पिकैर्नवरसा रसालच्छटा
विखण्डितफला शुकैरिह च दाडिमीवीथिका ।
प्रनृत्तशिखिमण्डलाऽत्र च विभाति नीपावलि-
र्भ्रमद्भ्रमरमालिका बकुलपालिका चाग्रतः ॥ १६

विदूषकः – (सर्वतोऽवलोक्य) वअस्स, दाणिं खु ण का वि एत्थ दीसइ । तुवं दाव भमररेहंचिअचलणो विअ परिदो वि भमंतो कहिं वि ण चिट्ठसि । मह उण रक्खसीए विव बभुक्खाए पज्जाउलीकिदस्स पादा अग्गदो ण प्पसरदि । ता एत्थ एव्व सिणिद्धच्छाए कअंब-तरुमूलम्मि विस्समिस्सं । (इत्युपविशन् कर्णं दत्वा सहर्षम्) वअस्स, हत्थं दक्खिणेण वणभोअणमिलि-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

आणं मिव ब्रम्हणाणं मंतज्झणी सुणीअदि । ता अणुमण्णदु मं वअस्सो तहिं गमणस्स । (वयस्य, इदानीं खलु काऽप्यत्र दृश्यते । त्वं तावद् भ्रमर-रेखाञ्चितचरण इव परितोऽपि भ्रमन् कुत्रापि न तिष्ठसि मम पुनः राक्षस्येव बुभुक्षया प्रत्याकुलीकृतस्य पादाव-ग्रतो न प्रसरतः । तदत्रैव स्निग्धच्छाये कदम्बतरुमूले विश्रमिष्यामि । वयस्य, हस्तं दक्षिणेन वनभोजन-मिलितानामिव ब्राह्मणानां मन्त्रध्वनिः श्रूयते । तदनु-मन्यतां मां वयस्य तत्र गमनाय ।

मन्मथः — सखे, दुर्निरोधसमुत्साहोऽस्मि ।

विदूषकः — वड्ढदु भवं । (वर्धतां भवान् ।)

(इति निष्क्रान्तः)

मन्मथः — (सस्मितम्) कथं गत एवौदरिकः ! (इति नयनानन्दनान् नन्दनप्रदेशानभितो निभालयन् ? सकौतुकम्)

मल्ली सेयमिहान्तिकस्थितमिमं माकन्दमासेवते
ताम्बूली ननु शोभते समधिकं पूगद्रुमालम्बिनी ।
आलिङ्गत्यधुना लवङ्गलतिका तक्कोलमुच्चैरिदं
साहित्यं स्पृहणीयभावमयते वल्लीतरूणामपि ॥ १७

हन्तास्मिन्नपि नन्दने वने रतिं न विन्दामि ।

[इत्युत्कण्ठां नाटयति]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

(ततः प्रविशति कुसुमापचयलीलामभिनयन्ती सह सखीभ्यां रतिः)

रतिः — (स्वगतम्) अम्हो, पुव्वस्सिं दिअहे अभूतपुव्वं कुदो मह समुप्पण्णं सौहाहिरोहणकोदूहलं । समुप्पण्णे वा तस्सिं णअरवीहीए तुरअं णच्चअंतस्स तस्स सुहअस्स कुदो णु णिव्वुत्तं जदिच्छादंसणं । दिट्ठे अ सअलणाअरलोअसाहरणं तस्सिं कुदो वा कुलम्हि आजण सीलपडिवुलो मह सुइरपरिइदे विअ एक्कपए जणिदो एरिसो अणुराओ जेण खु संपदं ।

पिदुर्हि परतंताए परोक्खपेम्मं वि तं णिसामेदुं ।
उत्तम्मइ किं मिव मे उज्झिअधीरत्तणं हि अअं ॥

(इति चिन्तयन्त्यन्यतः पदं न्यस्यति)

(अहो पूर्वस्मिन् दिवसेऽभूतपूर्वं कुतो मम समुत्पन्नं सौधाधिरोहणकौतूहलम् । समुत्पन्ने वा तस्मिन् नगरवीथ्यां तुरगं नर्तयतस्तस्य सुभगस्य कुतो नु निर्वृत्तं यदृच्छादर्शनम् । दृष्टे च सकलनागर लोकसाधारणं तस्मिन् कुतः कुलकन्यकाजनशीलप्रतिकूलो मम सुचिरपरिचित इव एकपदे जनितः ईदृशोऽनुरागो येन खलु साम्प्रतम् ।

पितृभ्यां परतन्त्रायाः परोक्षप्रेमापि तन्निशमयितुम् ।
उत्ताम्यति किमिव मे उज्झितधीरत्वं हृदयम् ॥) १८

सखी — (सपरिहासम्) हला रइ, अइदाइं व पुप्पाइं मह करगए समुगए अणिक्खिविअ कहिं पत्थिदा सि? (हला

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

रते, इदानीमपि पुष्पाणि मम करगते समुद्गके निक्षिप्य कुतः प्रस्थिताऽसि ?)

रतिः — (सव्रीलावहित्थम्) सहि कीरवाणि, इमस्स अहिणवुग्ग अकिसल अग्गासकसाअकंठकलअंठकंठसमुदंचिअपंचमुग्गार-विवसीकिदजुवजणमाणसस्स णिरंतरणिवडंतमअरंदणी-संदमिलतपुल्लअरविंदकलअलंचिअमंजुलमंजरीसोरहाहिवासि-अदसदिसामुहस्स परिणदफलभरजिहच्छासमूसुअकुल-कलालावसुहअस्स सह आरपाअवस्स सोहग्गेण ओहरि-दहिअआ तुह परिहासविसओ म्हि संवुत्ता । (सखि कीरवाणि, अभिनवोद्गतकिसलयग्रासकषायकण्ठकलकण्ठ-समुदञ्चितपञ्चमोद्गारविवशीकृतयुवजनमानसस्य निरन्तरनिप-तन्मकरन्दनिष्यन्दमिलत्फुल्लदरविन्दकलकलाञ्चितमञ्जुल-मञ्जरीसौरभाधिवासितदशदिङ्मुखस्य परिणतफलभरजि-घत्सासमुत्सुकशुककुलकलालापसुभगस्य सहकारपादपस्य सौभाग्येनापहृतहृदया तव परिहासविषयोऽस्मि संवृत्ता ।

अन्या — हला रइ, सअललोआणंदणगुणगणमहुरस्स पुरवीहीदिट्ठ अरस्स तस्स महाभाअस्स त्ति भणिदव्वे किं रसालावदेसेण ! (हला रते, सकललोकानन्दनगुणगणमधुरस्य पुरवीथीदृष्टचरस्य तस्य महाभागस्येति भणितव्ये किं रसालापदेशेन ?)

रतिः — सहि कोइलवाणि, तुवं वि किदसंकेदा विअ कीरवाणीए एव्व अणुहरेसि ता मिच्छासंकावदीणं तुम्हाणं सविहे ण

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

चिट्ठस्सं । (सखि, कोकिलवाणि, त्वमपि कृतसङ्केतेव कीरवाण्या एवानुहरसि तन्मिथ्याशङ्कावतीनां युष्माकं सविधे न स्थास्यामि ।)

(इति सप्रणयकोपं पदान्तरे स्थित्वा पुष्पाण्यवचिनोति ।)

मन्मथः — (करगतं कीरमवलोक्य) अयं तावदशनायया तान्तलोचनः प्रतिभाति, तदेनं सुहितं करोमि (इति पार्श्वतश्चक्षुः प्रसारयन्) अस्मिन् लतावितानवलयिते नातिदूरस्थिते सहकारतरावसौ पचेलिमः फलस्तवको निजसौरभेन समाकर्षति मे चेतः । अवतारयाम्यस्मादेकम् ।

(इति धनुर्मुक्तया घुटिकया फलं पातयति ।)

रतिः — (सप्रमोदाद्भुतं सख्यौ प्रति) हला, बुलोएह एदं ओलूपापसूणगब्भे मह उत्तरिअअंचले अअंडणिवडिदं परिणदं सहआरफलं । (हला, पश्यताम्, ओलूपाप्रसूनगर्भे ममोत्तरीयाञ्चलेऽकाण्डनिपतितं परिणतं सहकारफलम् ।)

सख्यौ — (सरभसमुपसृत्य) पिअसहि रइ, अविलंबिअं मणरहसिज्झिसूअओ एस दे फललाहो । (प्रियसखि रते, अविलम्बितं मनोरथसिद्धिसूचक एष ते फललाभः ।)

मन्मथः — (सहकाराभिमुखमर्पितकतिपयपदो रतिमवलोक्य सानन्द सम्भ्रमम् ।)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सेयं सेयं शशधरमुखी या मया दृष्टपूर्वा
 वित्रस्तैणीचपलनयना चन्द्रिका चेतसो मे ।
मोहो वेत्थं मम स च कथं स्याद् यदस्याःसखीभ्यां
 स्वैरालापः कलयति सुधासम्भृतां श्रोत्रसीमाम् ॥ १९

अधुना तावदनया —

पादाग्रस्थितया ऋजूकृतवलिप्रव्यक्तरोमावलिः-
 उवासोदञ्चदुरोजकोशयुगलं चोन्नम्रया यत्नतः ।
न्यश्वन्त्याऽप्यवशान्नितम्बभरतः स्विद्यल्ललाटं शनै-
 श्छिन्दत्या कुसुमं तरोःकवचितं लोलभ्रुवा मे मनः ॥ २०

(निपुणं निरूप्य) अहो रूपसम्पदे तस्याः ।

आदातुं सह पल्लवैः प्रयतते पाणिं स्वमप्यञ्जसा
 साकं पुष्पभरेण च स्मितरुचं हन्तापचेतुं निजाम् ।
किञ्चोत्सारयितुं समं मधुकरैर्लोलां कटाक्षश्रियं
 सत्रैषा ? लतया भुजां नमयितुं सुभ्रूःस्वकीयामपि ॥ २१

रतिः — (सहकारफलं हस्ते कुर्वती विभाव्य) हला, कस्स विधाणुक्कस्स घुडिआहिघादस मुक्खुडिदविंतं विअ दीसइ एदं । (हला, कस्यापि धानुष्कस्य घुटिकाभिघात-समुत्खुडित - वृन्तमिव दृश्यत एतत् ।)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सख्यौ — पिअसहि, जं वा होज्ज, सुसउणं खु एदं पिअसहीए ।)
(प्रियसखि, यद् वा भवतु, सुशकुनं खल्वेतत् प्रिय-
सख्यै ।)

मन्मथः — इदं तावत्कारणं ममात्मानमाविष्कर्तुमाभिश्च वाचं मिश्रयितुम् ।
(इति स्वयमवपातितं सहकारफलमादित्सुरिवोपसर्पति ।
सर्वाः ससम्भ्रमाश्चर्यं मन्मथमवलोकयन्ते ।)

रतिः — (सहर्षमात्मगतम्) - दंसिदसिज्झी दाणिं चेअ मह
परदेव्वदाराहणव्ववसाओ । जं इमो रच्छादिट्ठअरो
हिअअपाडच्चरो जणो कुदो वि एत्थ आअच्छिअ मह
लोअणाणं सुहं उप्पादेई । (दर्शितसिद्धिरिदानीमेव मम
परदेवताराधन व्यवसायः । यदयं रथ्यादृष्टचरो जनः
कुतोऽप्यत्रागत्य मम लोचनयोः सुखमुत्पादयति ।)

(इति सस्पृहं साचिप्रेरितया दृशा मन्मथं निशामयति)

मन्मथः — (सप्रत्याशमात्मगतम्)

तिर्यग्विवलितनयनं तरलाक्षी मामवेक्षमाणैषा ।
वरणाय निर्मिमीते विकचोत्पलमालिकामिवापूर्वाम् ॥ २२

अपि च,

द्रघीयसी कृशाङ्ग्या दृष्टिः कृष्णार्जुनश्रियं दधती ।
सेनेव पाण्डवानां श्रयते कर्णातिलङ्घनोल्लासम् ॥ २३

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

(विमृश्य)

अचिरविन्यस्तपदेन तावदस्यां यौवनेन भवितव्यम् ।

तथाहि,

लावण्याम्बुझरीतलादिव शनैरुन्मज्जतः साम्प्रतं
कुम्भौ यौवनकुञ्जरस्य तदिमौ जानामि वक्षोरुहौ ।
तद्गण्डस्थलनिस्रुता विलसति स्रस्तेव दानाम्बुनो
धारैषोदरसीम्नि चञ्चलदृशो रोमावलीकैतवात् ॥ २४

किञ्च,

मा भून्नम्रा कुवलयदृशो गात्रवल्लीति धात्रा
वेणीदम्भात्सदयमनसाऽदायि पश्चादुपघ्नः ।
न्यस्ता पीनस्तनफलभरप्रोद्गमे रोमराजि-
व्याजाद् यष्टिर्नियतमुदरे यौवनेनैन्द्रनीली ॥ २५

(प्रकाशम्, सख्यौ प्रति) भवत्यौ, अपि समेधितफलो वां सख्याः कुसुमापचयः ?

सख्यौ – (सविनयम्) महाभाअ, एण्डिं एव्व । (महाभाग, इदानीमेव ।)

मन्मथः – (स्वगतम्) अहो प्रगल्भता वचनस्य ! (प्रकाशम्) भवत्यौ, कोमलतनोरायासातिशयाय लक्ष्यते खल्वयं कुसुमानां स्वहस्तापचयः । यतः,

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

विस्रस्तं कबरीभरेण बहलीभूतं श्रमाम्भः कणै-
रुत्कम्पिस्तनमण्डलैरुपचितं श्वासैरसीमोद्गमैः ।
तान्तं मध्यभुवा नितान्तमधुना सूनेषु लूनेष्वपि
द्वित्रेष्वेणदृशः कराङ्गुलियुगे हन्तारुणिम्नैधितम् ॥ २६

रतिः — (लज्जां नाटयति)

सख्यौ — महाभाअ, ओणीदपलिस्समा णो पिअसही इमिणा महाभाअस्स महुरेण वअणोवण्णासेण । (महाभाग, अपनीतपरिश्रमा नः प्रियसखी अनेन महाभागस्य मधुरेण वचनोपन्यासेन ।)

मन्मथः — (स्वगतम्) अये, साकूतमिदमनयोर्जल्पितम् ।
(प्रकाशम्) भद्रे, यदि सौहृदमस्मासु तदलङ्क्रियतामचिरमिवेयमनुनिशमिन्दुकरस्कन्दलसम्बन्धनिष्यन्दिनी चन्दनाचलगन्धवहस्तनन्धयस्पन्दशिशिरा चन्द्रकान्तमयी बालरसालमूलवेदिका ।

सख्यौ — (सप्रश्रयम्) महाभाअ, अणुगहीद म्हो । (रतिं प्रति) हा हला, माणणीअवअणो अम्हाणं अआरणमित्तं एस महाभावो । (महाभाग, अनुगृहीते स्वः । हला, माननीयवचनोऽस्माकमकारणमित्रमेष महाभागः ।

(इति सर्वे उपविशन्ति)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मन्मथः – भद्रे, भवत्सौजन्येन दत्तानुयोगावसराः स्मः ।

सख्यौ – महाभाअ, ओहिद म्हो । (महाभाग, अवहिते स्वः ।

मन्मथः – भवत्यौ, कां नामाभिजनो जन्मना परिष्कृतोऽनयाऽभिरूपया ?

किञ्च,

अस्निग्धैः शिरसीरुहैरङ्गैरमृजाविधानधूसरितैः ।
वसनेन क्षौमेण च वेदाहमिमां कुतोऽपि धृतनियमाम् ॥ २७

सख्यौ – महाभाअ, इयं णो पिअसही तत्तहोदो राअस्स अज्जाए मुदिआए समुप्पण्णा कण्णा, रई णाम । इमेसु दाव सुरद्धएसु अणुगहीदजोव्वणाए अदिसइदतेल्लोक्कमहिलाजणलोण्णसंपत्तीए इमाए अणुरूववरलाहसावेक्खेण गुरुअणेण उवदिट्ठो भअवदीए सोहग्गजणणीए परदेव्वदाए पसादकिदे समाराहणविही । ता एस णिअमपरिग्गहो । एसा अ सहत्थेण ओएदव्वदा पसूणाणं । (महाभाग, इयं नः प्रियसखी तत्रभवतो रागस्यार्यायां मुदितायां समुत्पन्ना कन्या रतिर्नाम । एषु तावद् दिवसेषु, अनुगृहीतयौवनया अतिशयितत्रैलोक्यमहिलाजनलावण्यसम्पत्तेरनुरूपवरलाभसापेक्षेण गुरुजनेनोपदिष्टो भगवत्याः सौभाग्यजनन्याः परदेवतायाः प्रसादकृते समाराधनविधिः । तदेष नियमपरिग्रहः, एषा च स्वहस्तेनावचेतव्यता प्रसूनानाम् ।)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मन्मथः — (साश्वासम्, स्वगतम्) औपयिक एवास्यां मे प्रेमानुबन्धः। (प्रकाशम्) भद्रे, उपलब्धमिहैवाभिजात्यगुणश्रियोः सामानाधिकरण्यं यदाशास्यं कन्यासु, समुचिता च परदेवताप्रसादसम्पिपादयिषा ।

रतिः — (स्वगतम्) कुसलं मंतिअं महाभाएण । (कुशलं मन्त्रित महाभागेन ।)

सख्यौ — महाभाअ, एदिसेण अत्तहोदो पकिदिसरलत्तणेण जणिदा णो जिण्णासा, किंणामहेओ महाभाओ त्ति । (महाभाग, ईदृशेनात्रभवतः प्रकृतिसरलत्वेन जनिता नो जिज्ञासा, "किन्नामधेयो महाभाग" इति ।)

रतिः — (स्वगतम्) हिअअ, मा उत्तम्म । तुह चिंतिदाणुरूवो एव्व सहीणं अणुओओ । (हृदय, मा उत्ताम्य । तव चिन्तितानुरूप एव सख्योरनुयोगः ।)

मन्मथः — भद्रे, अपि श्रुतपूर्वो भवतीभ्यां मन्मथो नाम ?

सख्यौ — महाभाअ, आं । (महाभाग, आम् ।)

मन्मथः — तमेवैतं जानीतम् ।

सख्यौ — (सविस्मयं जनान्तिकम्) कहं सो एसो जो किल सुणीअदि भअवदो लच्छीवल्लहस्स तणओ सीमा सोंदेरस्स इत्थिआपुंसाणं विलासोवदेसदेसिओ वम्महो त्ति? (प्रकाशम्)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

महाभाअ, किदत्था अम्हे महाभाअस्स दंसणब्भुअएण । (कथं सैष:? य: किल श्रूयते भगवतो लक्ष्मीवल्लभस्य तनय:, सीमा सौन्दर्यस्य स्त्रीपुंसयोर्विलासोपदेशदेशिको मन्मथ इति । महाभाग! कृतार्थे स्वो महाभागस्य दर्शनाभ्युदयेन ।)

मन्मथः – भवत्यौ, ममापि सफलं चक्षुर्दर्शनीयदर्शनेन । (उदयदद्यौवनावस्थाविशेषां रतिं निर्वर्ण्य स्वगतम्) (का अवस्था ?)

प्रस्विन्नपुलकिताङ्गं प्रहितप्रतिसंहृतालसदृगन्तम् ।
सङ्गतवेपथुसुतनोः स्थितिरियमस्याश्चिरं जीयात् ॥ २८

सख्यौ – (रतिं मन्मथञ्च निरूपयन्त्यौ, अपवार्य) अइ, अण्णोण्णाणुरूवसंपत्ताणं एदाणं दोण्णं वि समाअमो होएज्जइ, ता चरिअत्थं विहिणो णिम्माणकोसलं । अयि, अन्योन्यानुरूपसम्पदोरेतयोर्द्वयोरपि समागमो भवेत् तच्चरितार्थं विधेर्निर्माणकौशलम् ।

रतिः – (सौत्सुक्यम्, स्वगतम्) कुदो मह एरिसं भा अहेअं । (कुतो ममेदृशं भागधेयम्)

(प्रविश्य)

परिचारिका – भट्टिदारिए, सज्जीकिदसव्वजोव्वअरणा अज्जू भट्टिदारिअं पडिवालेइ, ता तुवर देव्वदा अदणगमणस्स । (भर्तृदारिके,

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सज्जीकृतसपर्योपकरणा आर्या भर्तृदारिकां प्रतिपालयति । तत् त्वर देवतायतनगमनाय ।)

मन्मथः – (सखेदमात्मगतम्) इयं हि चिरस्यामृतवर्षिणीं कादम्बिनीमनिमेषमापिबतो नयनाभ्यां चातकस्य पातकस्यन्दफलं वात्याविस्फूर्तिः ।

रतिः – (सविषादम्, स्वगतम्) हा देव्वहदअ, खणमेत्तं वि एदस्स लोअणामिअस्स मे तुवं असहणो संवुत्तो । (हा दैवहतक! क्षणमात्रमप्येतस्य लोचनामृतस्य मे त्वमसहनः संवृत्तः ।) (इति जिगमिषया सखीमुखमीक्षते)

सख्यौ – (मन्मथं प्रति) अणुजाणादु णो णिरंतरावेक्खणिज्जसंणिही महाभाओ भूओ वि दंसणसुहलाहस्स । (अनुजानातु नो निरन्तरापेक्षणीयसन्निधिर्महाभागो भूयोऽपि दर्शनसुखलाभस्य ।)

मन्मथः – (साभ्यनुज्ञमिव) साधयन्तु भवत्यः स्वेष्टसिद्धये सर्वतोऽयश्चायं जनो विस्रम्भकथासु ।

रतिः – (स्वगतम्) महाभाअ, तुमए ओहरिदहिअआए मइ कुदो णु सम्हरणस्स अवआसो ? (महाभाग, त्वयाऽपहृतहृदयाया मम कुतो नु संस्मरणस्यावकाशः ?)

सख्यौ – महाभाअ, अम्हकेरा खु अब्भत्थ णा एसा । (महाभाग आवयोः खल्वभ्यर्थनैषा ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

रतिः — (स्वगतम्) किं करोमि अणीसा अप्पणो । अज्जूणिओआ मं बलामोडिअ णेइ । (किं करोमि, अनीशाऽऽत्मनः । आर्यानियोगो मां बलादामोड्य नयति ।)

(इत्यनिच्छन्त्येव कथमपि सखीभ्यां सह निष्क्रान्ता परिचारिकया च)

मन्मथः — (सपरितापम्) अहो, सान्तरायाणि सुखानि नाम । यदियमकालजलेन प्रतिकूलेन दैवेनान्तरिता मे नयनानन्दिनी चन्द्रिका । कः पुनरस्याः करग्रह उपायः ? (इति चिन्तां नाटयन् साश्वासम्) निर्व्याजवत्सला तावदस्मासु भगवती परदेवतायाश्चतुर्थावरणदेवता सर्वार्थसाधिका । तदमुनैव तीर्थेन सुखमवतराम्येनां लावण्यपूरसरितम् । इह च कर्तव्ये नियोक्तव्यो मन्त्री वसन्तः । (सानुस्मरणम्) हन्त, प्रियासन्दर्शनानन्दपरवशेन मया विस्मृत एवास्य कीरस्य सौहित्यविधिः । तद्रसालफलान्तरमवपात्य समर्पयाम्यस्मै । (इति तथा करोति)

(नेपथ्ये)

(मङ्गलशङ्खनिस्वनानन्तरम्)

उन्नालाम्बुजिनीदलस्य शिशिरां छायामुपासेदुषी-
श्चञ्चूपात्तबिसाङ्कुरार्पणपरान्योन्यं रसात् क्रीडतोः ।
मध्याह्नोऽपि महोत्सवः प्रववृते सोऽयं रथाङ्गाह्वयोः

CC-0.Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मन्मथः – (आकर्ण्य) साधूक्तं वैतालिकेन । यतः,

हृद्यं तस्य तदेव यस्य घटते यस्मिन् रतिश्चेतसः ॥ २९

(ऊर्ध्वमवलोक्य) कथं गगनमध्यमध्यारूढो भगवान् निदाघदीधितिः ?

वेगाक्रान्तनितान्तदीर्घसरणिर्भासान्निधेः स्यन्दनो
यन्मध्ये गगनं विकुण्ठितगतिर्निस्पन्दतां विन्दति ।
जाने तल्लुटितोत्थितान् खगपतेर्भ्राताऽधुना स्वर्धुनी
पूरस्नापितपायितान् गमयते विश्रान्तिमश्वानिति ॥ ३०

तदहमपि प्रियतमाविश्लेषदवथुनिचुलितान्तरो दुर्वारसर्वतापनिर्वापयित्रीमस्य नन्दनोद्यानस्य पार्श्वतो निष्यन्दमानां मन्दाकिनीमवगाह्य माध्यन्दिनं विधिं निर्वर्तयिष्यामि ॥

(इति निष्क्रान्ताः सर्वे)

॥ प्रथमोऽङ्कः समाप्तः ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ द्वितीयोऽङ्कः ॥

(ततः प्रविशतश्चेट्यौ)

एका – सहि मऊरिए, तह पमुद्धा वि भट्टिदारिआ एआरिसी संआद त्ति अच्चेरं खु एदं । (सखि मयूरिके, तथा प्रमुग्धाऽपि भर्तृदारिका एतादृशी सञ्जातेति आश्चर्यं खल्वेतत् ।)

अन्या – पिउच्छे सारिए, सरला सि तुवं किं ण पेच्छसि भट्टिदारिआइ विलसिदं जोव्वणस्स ! (प्रियसखि सारिके, सरलाऽसि त्वं, किं न प्रेक्षसे भर्तृदारिकाया विलसितं यौवनस्य ?)

[संस्कृतमाश्रित्य]

प्रागहनां त्रितयादुपात्तपरिधी ह्यः पूगसाम्यस्पृशा-
वद्यत्वे तु कुचौ तुलां न सहतौ जम्बीरमालूरयोः ।
श्वो वा तत्परतोऽपि वाऽहनि सखी स्यातां कियन्तौपुन-
स्तन्वङ्ग्या क्व भुजान्तरं क्व नु समारम्भोऽनयोरीदृशः ॥

सारिका – साहु दिट्ठ सहीए । इमेसु दवा सुरब्धएसु । (साधु दृष्टं सख्या । एषु तावद् दिवसेषु ।)

[संस्कृतमाश्रित्य]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

आलेख्ये मिथुनं कृतव्यतिकरं साकूतमालोकते
पाञ्चालीविहृतौ च सङ्कलयति द्वन्द्वं तदीयं रहः ।
उत्कण्ठामयते निशम्य चरितं स्त्रीपुंसयोर्नाटके
पृष्टा तच्च सखीजनेन सुतनुर्भूयस्तरां लज्जते ॥ २

तक्केमि अदो च्चिअ सरिसजामादुलाहक्किदे पज्जाउलहिअओ पेक्खीअदि तादो अज्जू अ । (तर्कयामि, अत एव सदृशजामातृलाभकृते प्रत्याकुलहृदयः प्रेक्ष्यते तात आर्या च ।)

मयूरिका – पिउच्छे, चिताउलधरं खु सव्वस्स वि कण्णआपिदुत्तणं णाम । (अनुस्मृत्य) साहु भणिदं केणवि अणुहवसालिणा एदं । (प्रियसखि, चिन्ताकुलगृहं खलु सर्वस्यापि कन्यकापितृत्वं नाम । साधु भणित केनाप्यनुभवशालिनैतत् ।)

(संस्कृतमाश्रित्य)

जातां तनूजामनु लब्धजन्मा चिन्ता दुरन्ता यमला स्वसेव ।
संवर्धमानामनु चैधमाना शश्वद् गुरूणां हि मनो दुनोति ॥ ३
इति ॥

सारिका – सहि मऊरिए, हिओ किल रअणीए अज्जूतादेहि उवक्कंते वरइत्ताणं पत्थावे आअण्णिदं हि पिअसहीए वि तत्तहोदो वम्महस्स पसंसणं । जह, (सखि मयूरिके,

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ह्य: किल रजन्यामार्यतातांभ्यामुपक्रान्ते वर्यत्वानां प्रस्तावे आकर्णितं हि प्रियसख्याऽपि तत्रभवतो मन्मथस्य प्रशंसनम् । यथा,)

(संस्कृतमाश्रित्य)

देवश्शार्ङ्गधरःपिताऽस्य जननी सा लोकमाताऽग्रजः
भ्राताऽप्यम्बुजसम्भवो दिविषदां नेता पितृव्यः पुनः ।
शर्वाण्येव पितृष्वसा जलनिधिर्मातामहो मातुल-
श्चन्द्रो हन्त वरःस्वयं तु मदनः क्वेदृग्गुणश्रीर्भवेत् ॥ ४

इति ।

ता किंति कण्णाअण्णिआए आअण्णिअणि अधूआपरिदाववुत्तंतो वि तादो अणुरूवगुणाणं इमाणं दोण्णं वि ण णिव्वत्तेइ पाणिग्गहमंगलं ? (तत्किमिति कर्णाकर्णिकयाऽऽकर्णितनिजदुहितृपरितापवृत्तान्तोऽपि तातोऽनुरूपगुणयोरनयोर्द्वयोरपि न निर्वर्तयति पाणिग्रहमङ्गलम् ? ।

मयूरिका – पिउच्छे, अणहिण्णासि लोअव्ववहारस्स वरपक्खीएहि चेअ बहूपत्थणा सिलाहणिज्जेति । (प्रियसखि ! अनभिज्ञाऽसि लोकव्यवहारस्य, वरपक्षीयै रेव वधूप्रार्थना श्लाघनीयेति ।)

सारिका – (सचिन्तम्) हला, कहं णु खु एदं संविहाणं होएज्जई ? (हला कथं नु खल्वेतत् संविधानं भवेत्)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मयूरिका - पिउच्छे, किदं विआरेणा भट्टिदारिआराहणपरितुट्ठाए परदेव्वदाए सअं एव्व णिउत्ता एत्थ अज्जूए सहपंसुकीलण-मही भअवई सव्वत्थसाहिएव्व सव्वत्थं साहइस्सइ। (प्रियसखि, कृतं विचारेण। भर्तृदारिकाराधनपरितुष्टया परदेवतया स्वयमेव नियुक्ताऽत्रार्याया: सहपांसुक्रीडनसखी भगवती सर्वार्थसाधिकैव सर्वार्थं साधयिष्यति।

सारिका - अम्हहे पसादसुलहत्तणं परमेसराए! किंणो सहि ओलीढे महुरसे विअसेवणेण विअ रच्छामुहमुहुत्तमेत्तदिट्ठस्स तस्स महाभाअस्स वम्महस्स पुणो वि णंदणुज्जाणम्मि सविसे-सदंसणेणभट्टिदारिआए एरिसी हिअआवत्था णमूणीआदि सो उण केरिसो इमस्सिं ति। (अहो प्रसादत्वं परमेश्वर्या:! किं नु सखि अवलीढे मधुरसेवनेनेव रथ्या-मुखमुहूर्त्तमात्रदृष्टस्य तस्य महाभागस्य मन्मथस्य पुनरपि नन्दनोद्याने सविशेषदर्शनेन भर्तृदारिकाया ईदृशी हृदया-वस्थाऽनुज्ञायते, स पुन: कीदृशोऽस्मिन्निति?)

मयूरिका - हला, कहिदं खु एदाणं परप्पराणुराअसंवड्ढणपउत्ताए भअवदी पि अंतेवासिणीए तत्तहोदीए वासिणीए, जह भट्टिदारिआए दंसणादो पहुदि बलिअं उत्तम्मइ, सो वि महाभाओ त्ति। (हला, कथितं खल्वेतयो: परस्परानु-रागसंवर्धनप्रवृत्ता भगवती अन्तेवासिन्या तत्र भवत्या

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

वशिन्या, यथा भर्तृदारिकाया दर्शनात् प्रभृति बलिक- मुत्ताम्यति सोऽपि महाभाग इति ।)

सारिका – पिअं मे, पिअं मे । (प्रियं मे, प्रियं मे ।)

मयूरिका – पिउच्छे, एण्हिं कहिं पत्थिदा सि ? (प्रियसखि, इदानीं कुतः प्रस्थिताऽसि ।)

सारिका — हला, भट्टिदारि आपिअसहीणं कोइलवाणीकीरवाणीणं वअणेण सिसिरोवआरसामग्गीसंपादणस्स । (हला, भर्तृदारिकाप्रियसख्योः कोकिलवाणीकीरवाण्योर्वचनेन शिशिरोपचारसामग्रीसम्पादनाय ।)

मयूरिका — पिउच्छे, एसा खु पज्जलिदे पावए सप्पिणो आहुदी । ताहिं चिंतिदपुव्वो सो एव्व भट्टिदारिआए अवहो- अवेअणाविणोअणोवाओ समुग्गदो पडिभाइ । (प्रियसखि, एषा खलु प्रज्वलिते पावके सर्पिषाहुतिः । ताभ्यां चिन्तितपूर्वः स एव भर्तृदारिकाया विरह - आवेदना- विनोदनोपायः समुद्गतः प्रतिभाति ।)

सारिका — सहि, कहं विअ ? (सखि, कथमिव ?)

मयूरिका — (सारिकायाः कर्णे) (एवं विअ । (एवमिव ।)

सारिका — (सशिरः कम्पम्) सहि, उववणं खु एदं । ता साहअ अविलंबिदं अप्पणो समीहिदं अहं वि जहणिओअं

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अणुठाइस्सं । (सखि, उपपन्नं खल्वेतत् । तत्साधय-विलम्बितमात्मनः समीहितम् । अहमपि यथानियोग-मनुस्थास्यामि ।

(इति निष्क्रान्ते)

॥ प्रवेशकः ॥

(ततःप्रविशति धारागृहगता सखीभ्यामुपचर्यमाणा रतिः)

रतिः — (स्वगतम्) हिअअ, पहट्ठदिट्ठं वि णंदणुज्जाणे चिरदिट्ठं विअ तं सहअं उद्दिसिअ किं ति एद्दहं संतप्पसि ? अह जह तह वा तुह पलिणामो होउ । एदिणा दे परिदावेण अदिक्कंददावेण तुइ णिरंतरसंणिहिदस्स तस्स सुउमा-लपकिदिणो का णु दसा होज्जत्ति पज्जाउल म्हि । हृदय, प्रहृष्ट-दृष्टमपि नन्दनोद्याने चिरदृष्टमिव तं सुभ-गमुद्दिश्य किमित्येतावत् सन्तपसि ? अथ यथा तथा वा तव परिणामो भवतु । एतेन ते परितापेनाक्रान्ततापेन तव निरन्तरसन्निहितस्य तस्य सुकुमारप्रकृतेः का नु दशा भवेदिति प्रत्याकुलाऽस्मि ।)

सख्यौ — पिअसहि, अवि सुहेइ तुमं धाराधरगब्भट्ठिअं पच्चग-विलूणेहि पल्लवेहि सज्जीकिदं सअणिज्जं अहिसअंति तक्कालणिप्पीडिएण मलअअरसेण अणुलित्तंगि अ एसो कण्हासीरताडवितसमीरो ? (प्रियसखि, अपि सुखयति

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

त्वां धाराधरगर्भस्थितां प्रत्यग्रविलूनैः पल्लवैः सज्जीकृतं शयनीयमधिशयानां तत्कालनिष्पीडितेन मलयजरसेनानुलिप्ताङ्गीञ्चैष कृष्णोशीरतालवृन्तसमीरः ?)

रतिः — (अनाकर्णितकेन, स्वगतम्) कहं णाम सो पिअजणो जस्सिंविगलिअवेज्जंतरं अणिसं सुमरिदे वि हिअअस्स होइ ण णिव्वुदि लेसो वि ! (कथं नाम स प्रियजनो यस्मिन् विगलितवेद्यान्तरमनिशं स्मृतेऽपि हृदयस्य भवति न निर्वृतिलेशोऽपि !)

सख्यौ — किं एदं पुच्छंतीणं वि अम्हाणं ण देसि पडिवअणं ? (किमेतत् पृच्छन्त्योरप्यावयोर्न ददासि प्रतिवचनम् ?)

रतिः — (श्रुतिमभिनीय) हला, किं भणाह ? (हला, किं भणथः ?)

सख्यौ — अपि सुहेई । अपि श्रूयतां (इत्यादि पूर्वोक्तं पठतः ।)

रतिः — (सनिःश्वासम्) हला, तत्तनाराअपंजरम्मि तिक्कणसूईसहस्ससिहरपडिदाए तुसदहणचुंबिदंगीए मह कहं णाम सरोसविसहरफुक्कारपवणेण वि सुहं उप्पज्जेउ ? (हला, तप्तनाराचपञ्जरे तीक्ष्णसूचीसहस्रशिखरपतितायास्तुषदहनचुम्बिताङ्ग्या मम कथं नाम सरोषविषधरफूत्कारपवनेनापि सुखमुत्पद्यताम् ?

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सख्यौ – (सोपालम्भामिव) पिअसहि, कुदो उण अणवेक्खिदगुरूअणा उज्झिअकुलकुमारीजणोइदसमाअरणा दाणिं ईरिसी दे ठिदी संवुत्ता? (प्रियसखि, कुतः पुनरनवेक्षितगुरुजना उज्झितकुलमारीजनोचितसमाचरणा, इदानीमीदृशी ते स्थितिः संवृत्ता?)

रतिः – (सप्रणयकोपम्) हला, किदं उवदेसेण, आअरह पकिदाणुरूवं। (हला, कृतमुपदेशेन, आचरतं प्रकृतानुरूपम्।)

सख्यौ – (ससम्भ्रमम्, अन्योन्यं प्रति) हला, ओणीअमम्मरिद किसलअसअणिज्जं उवकप्पिदपुप्फतप्पाओ सव्वंगसमप्पिदोशीराणुलेवणं अहिणवुद्धरिआहिं मिणालकणईहिं मंडअंतीओ अंगाइं हिमंबुसेअसिसिरिदेहिं पोम्मिणीपलासेहिं वीअअंतीओ णं उवअरम्ह। (हला, अपनीतमर्मरितं किसलयशयनीयमुपकल्पितपुष्पतल्पे सर्वाङ्गसमर्पितौशीरानुलेपनमभिनवोद्धृतैः पद्मिनीपलाशैर्वीजयन्त्यावेनामुपचाराव:।)

(इति तथा कुरुतः)

रतिः – (सपरितापातिरेकम्) हला, णूणं वज्जलेवकीलिदं मह जीविदं जं एरिसेहिं वि तुम्हाणं पओएहिं णावक्कामई। (सखि! नूनं वज्रलेपकीलितं मम जीवितम्, यदीदृशैरपि युष्माकं प्रयोगैर्नापक्रामति।)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

एका – (सविस्मयम्) हला, कोइलवाणि, अण्णेसु दाव णिम्मिसुएसु अणु रत्ताणं अम्मआणं होउ णाम वम्महो संदाव आरी। सस्सिं एव्व णिवद्धहावं वि इमं कहं एसो एवं विसूरेइ ? (सखि ! कोकिलवाणि ! अन्येषु तावत् निःउमश्रुषु - अनुरक्तानामस्माकं भवतु नाम मन्मथः सन्तापकारी । स्वस्मिन्नेव निबद्धभावामपि इमां कथमेष एवं खेदयति ?)

अन्या – सहि कीरवाणि, अहिमदवत्थुणो सहावो खु एरिसो जं अलाहे संदावेइ त्ति । (सखी कीरवाणी, अभिमतवस्तुनः स्वभावः खल्वीदृशो यदलाभे सन्तापयतीति ।)

रतिः – (सरभसोल्लासम्) हला, तुवरेह रअणासणस्स, एसो खु विण्णादसरीरोवदापउत्तंतो विअ मह सो पिअजणो संणिहिदो लक्खीअइ । (हला, त्वरतम्, रत्नासनाय, एष खलु विज्ञातशरीरोपतापोत्तप्त इव मम स प्रियजनः सन्निहितो लक्ष्यते ।)

सख्यौ – (सोद्वेगम्) पिअसहि, किदं वामोहेण । कुदो एत्थ कण्णअंतेउरे परकेरस्स पवेसकहा वि! । (प्रियसखि, कृतं व्यामोहेन । कुतोऽत्र कन्यकान्तःपुरे परस्य प्रवेशकथाऽपि !)

रतिः – (सासूयम्) हला, परकेरआ रई एउ वि तुम्हाणं । (हला, परकीया रतिरेवमपि युष्माकम् ।)

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सख्यौ – (स्वगतम्) अम्हो पेम्माणुबंधो एण्हिं एव्व तस्सिं
महाभाए पिअसहीए ! (अहो प्रेमानुबन्ध इदानीमेव
तस्मिन् महाभागे प्रियसख्याः !)

रतिः – हला, किं अद्दैतमदाणुपवेसिणीओ तुम्हे जं पच्चक्खदी-
संतं विअ संतं कहेह! । (हला, किमद्वैतमतानु-
प्रवेशिन्यौ युवां यत् प्रत्यक्षदृश्यमानमपि असन्तं कथयथः !)

सख्यौ – सहि विवेइणि, भमकप्पिअंवि वत्थु किं णु सच्चं होइ !
(सरोषमिव) दाणिं खु अप्पच्चेअवअणा संवुत्ता अम्हे
पिअसहीए । (सखि विवेकिनि, भ्रमकल्पितमपि वस्तु
किन्नु सत्यं भवति ! इदानीं खल्वप्रत्येयवचने संवृत्ते
स्वः प्रियसख्याः ।)

रतिः – (साश्रुपातम्) हला, अवि ण संणिहिदो सो पिअजणो !
ता हद म्हि मंदभाइणी । (हला, अपि न सन्निहितः
स प्रियजनः ! तद्धताऽस्मि मन्दभाग्या ।)

[इति मूर्च्छति]

सख्यौ — (ससाध्वसोत्कम्पम्, तालवृन्तेन वीजयन्त्यौ) पिअसहि,
समस्ससिहि समस्ससिहि । णं देसु चंदिमासीदलाए
दिट्ठीए दाणेण पस्सगअं पज्जाउलमणं इमं जणं ।
(प्रियसखी, समाश्वसिहि समाश्वसिहि । ननु पश्य
चन्द्रिकाशीतलाया दृष्टेर्दानेन पार्श्वगतं प्रत्याकुलमनसमिमं
जनम् ।)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

रतिः — (साश्वासमुन्मीलितलोचना पार्श्वतोऽवलोक्य सखेदम्) हला, पस्सगअं इमं जणं ति किं मं पदारेह! ण उण एत्थ सो हिअअवल्लहो। (हला, पार्श्वगतमिमं जनमिति किं मां प्रतारयथः। न पुनरत्र स हृदयवल्लभः।)

[इति पुनर्मोहेन निमीलति]

सख्यौ — (सवैमनस्यम्) कहं णु एसा समासासणिज्जा! ण विण्णाअदि खु पिअसहीए अप्पणो विणोअणत्थं सहत्थलिहिअपिअजणपडिल्लंदसुन्दरं चित्तफलअं पमुद्धाए सारिआए कहिं णिक्खित्तं ति। एण्हिं भअवदी चेअ मऊरिआमुहेण विण्णविदसहीविरहउत्तंता इह व्व एदाए वम्महदंसणेण समासासणे सरणं। (कथं नु एषा समाश्वासनीया! न विज्ञायते खलु प्रियसख्याऽऽत्मनो विनोदनार्थं स्वहस्तलिखितप्रियजनपडिल्लन्द सुन्दरं चित्रफलकं प्रमुग्धया सारिकया कुत्र निक्षिप्तमिति। इदानीं भगवत्येव मयूरिकामुखेन विज्ञापितसखीविरहवृत्तान्ता इहैव एतस्या मन्मथदर्शनेन समाश्वासने शरणम्!)

(ततः प्रविशति निजचन्द्रशालावातायनस्थो विदूषकेनाश्वास्यमानः सविरहव्यथो मन्मथः)

मन्मथः – सखे सांख्यायन, विप्रलब्धोऽसि। पूर्वेद्युराम्रभोजनसमुत्साहेन, यत्र दृष्टं दर्शनीयं भवता।

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

विदूषकः — वअस्स, तुए दाव आमस्सण्णं रुक्खं रुक्खं पडिहिंडंतेन बुभुक्खापरिसुक्कमुहेण समासादिअ सोहिच्चं । (वयस्य, त्वया तावदाम्रस्यान्नं - वृक्षं वृक्षं प्रतिहिण्डता बुभुक्षा-परिशुष्कमुखेन समासादितं सौहित्यम् ।)

मन्मथः — किमिह संशयोऽपि ? शरासनोन्मुक्तघुटिकाभिघातनिपातितं रसालफलमादातुमासेदुषा,

मूर्तेव नन्दनश्रीर्मनोरथस्येव सिद्धिरविलम्बा ।
माकन्दं निकषा सा मल्लीव सखे प्रिया ददृशे ॥ ५ ॥

सख्यौ — (विलोक्य साश्चर्यम्, जनान्तिकम्) उवक्कंतं विअ भअवईए अप्पणो भअवदित्तणं । (उपक्रान्तमिव भगवत्याऽऽत्मनो भगवतीत्वम् ।)

रतिः — (धृतिमभिनीय सप्रत्यभिज्ञमिव शनैरक्षिणी समुन्मीलयति)

सख्यौ — (साश्वासम्) विट्ठिआ पडिलद्धचेअणा पिअसही । (दिष्ट्या प्रतिलब्धचेतना प्रियसखी ।) (अपवार्य) कहं वा इमाए पिअजणवअणपच्चहिण्णावि । (कथं वाऽनया प्रियवचनप्रत्यभिज्ञापि ?)

विदूषकः — (स्वगतम्) एसो खु जुवरिअस्स हिमंबुसेओ । (एष खलु ज्वरितस्य हिमाम्बुसेकः ।) (प्रकाशम्) वअस्स, वम्मअस्स तुअ सव्वा वि इत्थि आलो अणगो अरे गदा सा चेअ । अह व भंतिणिम्मिआ होज्जाइ । (वयस्य, मन्मथस्य तव सर्वाऽपि स्त्री लोचनगोचरे गता सैव अथवा भ्रान्तिनिर्मिताऽपि भवेत् ।

CC-0T Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मन्मथः — जाल्म, कुतो मे भ्रान्तिः ! तदानीं हि,

मय्याकस्मिकदर्शने पुलकितप्रस्विन्नसर्वाङ्गकं
वक्षोजस्खलदुत्तरीयघटनव्यग्रैकहस्ताम्बुजम् ।
अङ्गुल्यग्रगलद्विलूनकुसुमं भूयो विसर्पत्पुन-
र्व्यावृत्तस्तिमितेक्षणं च सुचिरं तन्व्याऽवतस्थे तया ॥ ६

रतिः — (श्रुत्वा ससम्भ्रममात्मनः पूर्वार्द्धेन शयनीयं जहती प्रासाद-
गतं मन्मथमवलोक्य, सानन्दं स्वगतम्)

कंदोट्ट ? सामलंगो चंदोवमिदेण वअणलोण्णेण ।
णंदेह लोअणं मह णंदेइ इमो मणस्स अपमोहं ॥

(प्रकाशम्, सख्यौ प्रति) हला, किं एद पि वत्थु-
भमकप्पिदं ?

कन्दोट्टश्यामलङ्गश्चन्द्रोपमितेन वदनलावण्येन ।
नन्दयति लोचनं मम नन्दयत्ययं मनसश्च प्रमोहम् ॥ ७

हला, किमेतदपि वस्तु भ्रमकल्पितम् ?

सख्यौ — (जानान्तिकम्) अप्पआसणिज्जो खु एण्डि चेअ एसो
अत्थो ता अणुसरम्हो दाव णं । (अप्रकाशनीयः
खल्विदानीमेवैषोऽर्थस्तदनुसरावस्तावदेनम् ।) (प्रकाशम्)
पिअसहि, होउ णाम संपदं जहत्थं । (प्रियसखि, भवतु
नाम साम्प्रतं यथार्थम्)

रतिः — हला, सहावसिणिद्धेण एदिणा महाभाएण दाणिं
अम्हघरसविहम्मि विणिम्मिअं मिव सो हंतरं । (हला

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

स्वभावस्निग्धेनैतेन महाभागेनेदानीमस्मद्गृहसन्निधे विनिर्मित-
मिव सौधान्तरम् ।)

सख्यौ – (सावहित्थम्) सहि, तह किल पडिभाई । (सखि, तथा किल प्रतिभाति ।

विदूषकः – वअस्स, तह परवसा वि सा सुआदा किं ति तुमए हत्थेण ण गिहीदा ? (वयस्य, तथा परवशाऽपि सा सुजाता किमिति त्वया हस्तेन न गृहीता ?

मन्मथः – सखे, किं मामधीरमाशङ्कसे ?

विदूषकः – वअस्स, अदिधीरो एव्व भवं जं पुणो वि मह दिट्ठिगो-अरो सि । (वयस्य, अतिधीर एव भवान्, यत्पुनरपि मम दृष्टिगोचरोऽसि ।)

मन्मथः – (अनुस्मृत्य सोल्लासम्) सखे, दूरे गिरां हि तद्रूपरामणीयकम्।

नासाकर्णनिरुद्धलोचनमिथः सीमाक्रमोपक्रमं
भूयो जृम्भणकौतुकिस्तनभरापर्याप्तबाह्वान्तरम् ।
प्रौढारम्भनितम्बनिह्नुततदन्याङ्गावलोकक्रियं
तारुण्याद्भुतशिल्पमेव कलये तन्व्यावपुस्तादृशम् ॥ ८

विदूषकः — वअस्स, अणुराओ एव्व खु वत्थुणो सोदेरं संपादेइ । (वयस्य, अनुराग एव खलु वस्तुनः सौन्दर्यं सम्पादयति ।)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मन्मथः — मा तावत् । सहजसुभगाथास्तस्याः.

अधरमधुनो लोभात् केशद्विरेफसमूहतः
सरभसविनिर्याता काचित् सखे मधुपावलिः ।
सरसिजदृशो नासामासाद्य गन्धफली धिया
स्फुरति सभयं द्वधेव भ्रूमिषादभितः स्थिता ॥ ९

रतिः — (सविचिकित्सम्, सख्यौ प्रति) हला, का णु सा धण्णा तरुट्टिजा जा इमिणा वि महाभाएण एद्दहं पसंसीअदि । (हला, का नु सा धन्या तरुणी? याऽनेन महाभागेनैतावत् प्रशंस्यते ।)

सख्यौ — पिअसहि, सुणुमो दाव एदं, अग्गदो, फुडं होएज्जइ । (प्रियसखि, शृणुमस्तावदेतदग्रतः स्फुटं भवेत् ।

विदूषकः — वअस्स, पिपासिदो विअ कसायं वि सलिलं तं अप्पणो पिअं जणं अदिमेत्तं पसंसंतो मह कोदूहलं उप्पादेति । ता चित्तफलए आलिहिअ दंसेहि दाव । (वयस्य, पिपासित इव कषायमपि सलिलं तमात्मनः प्रियं जनमतिमात्रं प्रशंसन् मम कौतूहलमुत्पादयसि । तच्चित्रफलके आलिख्य दर्शय तावत् ।)

मन्मथः — अस्ति ममाप्येषोऽभिलाषश्चित्रगतामपि चारुगात्रीं भूयः पश्येयमिति । (नेपथ्याभिमुखमवलोक्य) कञ्चुकिन्, आनीयतामालेख्य फलकम् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

(प्रविश्य)

कञ्चुकी — (सप्रणामम्) देव, सज्जमेवेदम् ।

(इति चित्रफलकं पुरो निदधाति)

मन्मथः — (विलोक्य) बालिश, किमालेख्यसनाथमेतदाहर्तुमादिष्टोऽसि?

कञ्चुकी — (ससाध्वसम्) क्षमतां देवः देवस्य सामान्येनोपन्यासेनापराद्धोऽस्मि ।

विदूषकः — (सानुनयम्) वअस्स, पुरिसधम्मो खु पमादो णाम । (वयस्य, पुरुषधर्मः खलु प्रमादो नाम ।) (इति चित्रफलकमादाय निरूपयन्) कहं वअस्सो एव्व एत्थ आलिहिदो ? (कथं वयस्य एवात्रालिखितः ! अस्ति चावकाशः पार्श्वान्तरे विलेखनस्य ।)

मन्मथः— कञ्चुकिन्, कुत एतदुपगमः ।

कञ्चुकी — (सविनयम्) देव, देवोपवनपालकहस्तात् । कथितश्च तेन तत्रभवतो रागस्य कन्यागृहपरिचारिकया सारिकयाऽस्मत् उपवनसरसः सरसानि मृणालानि मृणालिनीपलाशानि चादायसरभसं प्रतिनिवृत्तया तत्तीरे निक्षिप्तविस्मृतमिदं मया समासादितमिति ।

विदूषकः — वअस्स, तक्केमि ताए सामिणो घरे दुआदिसमाराहणा होज्जत्ति । (वयस्य, तर्कयामि तस्याः स्वामिनो गृहे द्विजातिसमाराधना भवेदिति । (उत्थातुमिच्छति)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मन्मथः — (स्मयमानस्तमुपरुध्य) अद्य न किं मृणालान्युपयुज्यन्ते द्विजातिभोजने ? (कञ्चुकिनं प्रति) भद्र! स्वनियोगमशून्यं कुरु ।

कञ्चुकी — विजयतां देवः ।

(इति निष्क्रान्तः)

विदूषकः — वअस्स, मह तक्कं पुव्वपक्खं कुणंतस्स तुज्झ को णु सिज्झंतो ?(वयस्य, मम तर्कं पूर्वपक्षं कुर्वतस्तव को नु सिद्धान्तः ?)

मन्मथः — सखे, जाने कस्यचिदुपतापोपशमार्थोऽयमारम्भ इति ।

विदूषकः — जुज्जइ एदं । मन्मथप्रतिकृतिं निर्वर्ण्य) वअस्स, मुणामि एत्थ णअरीए सव्वाणं वि सिप्पिणं णेवुण्णं । अदिट्ठ-पुव्वा एरिसी सिप्परेहा ता कस्स उण होज्जइ ईरिस लोहकोसलं ? (युज्यत एतत् । वयस्य, जानामि, अत्र नगर्यां सर्वेषामपि शिल्पिनां नैपुण्यम् । अदृष्टपूर्वेदृशी शिल्परेखा, तत्कस्य पुनर्भवेत् ईदृशं लेखकौशलम् ?)

मन्मथः — (विदूषकहस्ताच्चित्रफलकमादाय निपुणमवधारयन् सहर्ष-रोमाञ्चम्)

या प्रस्विन्नदशा तनोरिह सखे रोमोद्गमो यःपुन-
र्यत्साचीभवनं दृशोःकरशुकग्लानिर्यदेवं क्षुधा ।

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

या प्राप्ताञ्जनरेखिकाकुटिलता योऽलक्तकाङ्कोऽङ्गुलि-
न्यासोऽमूनि तया वदन्ति सुदृशालेखं स्वहस्तार्पितम् ॥ १०

सारिकाहस्तविन्यस्तमिदमित्यनेन तु नेह सन्देहलेशोऽपि ।

सख्यौ — (अपवार्य) चेडीए अणवहाणं वि अणुउल्ल एव्व णो परिणदं इमस्स महाभाअस्स पिअसहीअणु राअसूअणेण । (चेटया अनवधानमप्यनुकूलमेव नः परिणतम्, अस्य महाभागस्य प्रियसख्यनुरागसूचनेन ।)

विदूषकः — साहु तक्किअं मुसलग्ग (इत्यर्धोक्ते) अहो पमादो, कुसग्ग-मइणा वअस्सेण । (साधु तर्कितं मुसलाग्र .... अहो प्रमादः, कुशाग्रमतिना वयस्येन ।)

मन्मथः — सखे, सम्प्रति ननु सफलं जन्म मन्मथस्य ।

विदूषकः — वअस्स, ठाउ अप्पसंभावणा, आलिहेदु भवं एत्थ अप्पणो पिअदमं । (वयस्य, तिष्ठत्वात्मसम्भावना, आलिखतु भवानत्रात्मनः प्रियतमाम् ।)

[इति तूलिकां समर्पयति]

मन्मथः — सखे, का मम शक्तिः कुरङ्गदृशः सौन्दर्यसर्वस्वमालिखितुम् । अथाप्यनुलङ्घ्यवचनो हि भवान् ।

[इति रतिप्रतिमां विलिखन्]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यद्येकस्मिन्नङ्गे किमपि लिखितेऽस्या ननु सखे
निमग्नं चक्षुर्मे हृदयमपि तत्रैव भवति ।
सकम्पस्वेदोऽयं प्रभवति न पाणिश्च सकलां
कथङ्कारं बालां कथय विलिखेयं तदधुना ॥ ११

(कथञ्चिदभिलिख्य दर्शयति)

विदूषकः – (विलोक्य सकौतुकमात्मगतम्) ठाणे खु इमस्सिं वअस्सस्स अणुराआणुबंधो । (स्थाने खल्वस्यां वयस्यस्यानुरागानुबन्धः । (प्रकाशम्) वअस्स, जहत्थ कहेहि, किं मह बम्हणीए रूवेण एसा सरिसि त्ति ? (वयस्य, यथार्थं कथय, किं मम ब्राह्मण्या रूपेण एषा सदृशीति ?)

मन्मथः – (सस्मितम्) सखे, रेखामात्रमिदमालेख्यगतं तद्रूपस्य । पश्य,

क्व चक्षुर्लीला सा क्व नु सरसमन्दस्मितकला
क्व वाणी वा हृद्या क्व नु च ललितं भ्रूविलसितम् ।
भवेदालेख्येऽस्मिन् क्व नु मधुरबिम्बाधरसुधा
क्व सौरभ्यं किञ्चाप्यवयवगतं पक्ष्मलदृशः ॥ १२

सख्यौ – [सोद्ग्रीवमवलोक्य] पिअसहि, विस्सत्था होहि, एदिणा दे दयिदेण तुवं एव्व वण्णिदा एत्थ आलिहिदा अ ।

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

(प्रियसखि, विश्वस्ता भव, अनेन ते दयितेन त्वमेव वर्णितात्राऽऽलिखिता च ।)

रतिः — [सव्रीडस्मितम्] हला, किंणेण तक्कालसमस्सासणेण ।
(हला, किमनेन तत्कालसमाश्वासनेन ।)

सख्यौ — [जनान्तिकम्] हं इमाए जाणिदं एदं संविहाणं । अह वा, अम्हेहिं चेअ अण्णहा तक्किअं होज्जा । (आम् अन्यथा ज्ञातमेतत् संविधानम् । अथवा, आवाभ्यामेवान्यथा तर्कितं भवेत । [प्रकाशम्] सहि, सव्वकालिअं वि होज्जइ । (सखि, सर्वकालिकं हि भवति ।)

विदूषकः — वअस्स, तुवं दाव अप्पणो पेम्मसरिसं भणसि मह उण पडिभाई तुह पडिकिदिजोएणव्व एसा मणहरत्ति । (वयस्य, त्वं तावदात्मनः प्रेमसदृशं भणसि । मम पुनः प्रतिभाति, तव प्रतिकृतियोगेनैवैषा मनोहरेति ।)

रतिः — (स्वगतम्) साहु, कहिदं अज्जेण ।
(साधु कथितमार्येण ।)

सख्यौ — एसो खु इमस्स सअणम्मि पक्खवादस मुइदो ववहारो । पिअसहीपडिमासणाहस्स महाभाअस्स वि किं ण होउ दंसणिज्जत्तणं । (एष खल्वस्य स्वजने पक्षपातसमुचितो व्यवहारः । प्रियसखीप्रतिमा सनाथस्य महाभागस्यापि किं न भवतु दर्शनीयत्वम् ।)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मन्मथः – सखे, तदानीं नन्दनाऽऽरामतः परदेवताराधनाय जनन्याहूत-निर्गताया न पर्याप्तदर्शनसुखोऽस्मि दयितायाः ।

[इति सस्पृहं विलोकयन्]

अस्याः सखे निरुपमाकृति दर्शने मे
चक्षुर्दशामभिलषन्त्यखिलेन्द्रियाणि ।
आलिङ्गने स्तनभरस्य पुनस्त्वगैक्य-
मास्वादने रसनतामधरामृतस्य ॥ १३

[सोत्कण्ठम्]

कदा पीनोन्नम्रं रहसि परिरप्स्ये कुचयुगं
कदा तावत् पास्याम्यधररसमस्याश्च मधुरम् ।
रतक्रीडाभूयः श्रमविशिथिलां गात्रलतिकां
कदा क्रोडे कृत्वा सुखमधिशयिष्ये च रजनीः ॥ १४

विदूषकः – वअस्स, उम्मत्तो विअ चित्तगअ पि एदं पच्चक्खं जाणि अ मंतेसि । (वयस्य, उन्मत्त इव चित्रगतामप्येतां प्रत्यक्षं ज्ञात्वा मन्त्रयसि ।)

मन्मथः – सखे, कृतमिव शब्दप्रयोगेण ।

मधुना रदच्छदजुषा माद्वीकरसेन वचसि भरितेन ।
तालश्रियाऽप्युरोरुहतटगतयाऽसौ कथं न मदयेन्माम् ॥ १५

अपि च, दर्शनात्प्रभृति,

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

व्यानक्तीव सुधाजलेन नयने क्षरतीव कर्णे किम-
प्याश्लेषेण दृढेन चन्दनरसं गात्रे विवालिम्पति ।
सैषा पाययतीव फाणितरसोदारं स्वबिम्बाधरं
दूरं गाहयतीव हर्षजलधेः पूरं ममेदं मनः ॥ १६

विदूषकः - वअस्स, णं भणामि, एसा चित्तगअत्ति । (वयस्य, ननु भणामि, एषा चित्रगतेति ।)

मन्मथः — [अन्यथा शङ्कमानः सोद्वेगम्] सखे, कथं चित्तगतैव मे वल्लभा, न पुनश्चित्रगताऽपि ।

[इति मूर्च्छति]

रतिः — [सभयोत्कम्पम्] हला, परित्ताअह परित्ताअह, मुच्छिदो एव्व इमो महाभाओ । (हला, परित्रायेतां परित्रायेतां मूर्च्छित एवायं महाभागः ।) [इति मोहमुपगच्छति]

सख्यौ — [सविषादम्] एसो खु रक्खाबंधणकम्मम्मि वेदालुग्गमो । (एष खलु रक्षाबन्धनकर्मणि वेतालोद्गमः ।)

विदूषकः — वअस्स, समस्ससिहि समस्ससिहि । (वयस्य, समाश्वसिहि समाश्वसिहि ।)

मन्मथः — [समाश्वस्य सनिर्वेदम्]

अनिन्दुरुचिराननैरनतिकातरालोकनै-
रनिक्षुमधुराधरैरपृथुलस्तनाडम्बरैः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

असंशयितमध्यमैरजघनप्रथीयःक्रमै-
रहसगतिभिः सुखैरलममन्मथोन्मादकैः ॥ १७

सख्यौ — पिअसहि, समस्ससिहि, समस्ससिहि । एसो दे पिअजणो लब्धचेअणो भविअ किं वि मंतेइ । (प्रियसखि, समाश्वसिहि समाश्वसिहि । एष ते प्रियजनो लब्धचेतनो भूत्वा किमपि मन्त्रयति ।)

रतिः — (लब्धसंज्ञा) अम्हहे, पच्चागअजीविओ एण्हिं सअलो वि जीवलोओ । (अहो, प्रत्यागतजीवित इदानीं सकलोऽपि जीवलोकः ।)

सख्यौ — [अपवार्य] अम्हो भअवईए जोअमाहप्पं जं रच्छंतरे परोक्खेणिव्वुत्तं वि एदं सव्वं एत्थ पच्चक्खं विअ अम्हेहिं अणुहवी अदि । (अहो भगवत्या योगमाहात्म्यं यद् रथ्यान्तरे परोक्षनिर्वृतमप्येतत्सर्वमत्र प्रत्यक्षमिवास्माभि-रनुभूयते ।)

विदूषकः — [सोपहासम्] वअस्स, अणदिक्कंतमुद्धभावाए तत्तहोदीए उत्ताणेहिं वि विब्भम्मेहिं कहं एद्दहं प्पज्जूसुओ सि ? (वयस्य, अनतिक्रान्तमुग्धभावायास्तत्रभवत्या उत्तानैरपि विभ्रमैः कथमेतावत्पर्युत्सुकोऽसि ?)

मन्मथः — [सस्मितमात्मगतम्] सत्यमनूचानश्रोत्रिय एवायम् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

लीढालीढरदच्छदं नवभवद्वक्षोजकोशार्पित-
व्यक्ताव्यक्तनखक्षतं प्रतिकलोदञ्चन्निषेधक्रियम् ।
मुक्तामुक्तवलग्ननीविगहनं साध्यं मृदूपायतो
लज्जाकुड्मलितेक्षणं च कृतिना लभ्येत मुग्धारतम् ॥ १८

[प्रकाशम्] सखे, न जाने कुतो देशिकादभ्यस्तं वा कुवलयदृशा तावदीदृशं संजननकलाकौशलम् । यतः —

वसन्तश्शीतांशुर्मलयपवमानः परभृता-
श्शुकाभृङ्गामाल्यं मधुमलयजं पङ्कजसरः ।
कलं गीतं लास्यं प्रमदवनमन्यच्च सकलं
प्रतीपं मे जातं ननु बत! ममैवोपकरणम् ॥ १९

विदूषकः — वअस्स, को अण्णो देसिओ होउ तुज्झ पिअमित्तादो तत्तहोदीए किअपदादो जोव्वणादो । (वयस्य, कोऽन्यो देशिको भवतु तव प्रियमित्रात् तत्रभवत्यां कृतपदात् यौवनात् ।

रतिः — [स्वगतम्] महाभाअस्स अप्पकेरो वि अणुजीविवग्गो एव्वं संवुत्तो । किं भणिदव्वं मारिसीए पडिऊलोत्ति । (महाभागस्यात्मनोऽप्यनुजीविवर्ग एवं संवृत्तः । किं भणितव्यं मादृश्याः प्रतिकूल इति ।

सख्यौ — असरिसो णं पम्मुद्धे कुलकुमारीअणे एव्वं णिव्वादारोवो। (असदृशो ननु प्रमुग्धकुलकुमारीजने निर्वादारोपः ।)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मन्मथः — अतस्तावत्,

दाहं हृद्यमवैमि चन्दनरसाच्चण्डातपं चन्द्रिका-
पूरात् किञ्च सुराधिपप्रहरणं श्रीखण्डशैलानिलात् ।
कुन्ताग्रैः कृतमास्तरं विचकिलस्तोमादिदानीं सखे
भृत्युं जीवनतोऽप्यलब्धदयिताश्लेषप्रमोदादहम् ॥ २०

रतिः — [स्वगतम्] पडिहदममंगलं पडिहदममंगलं । महाभाअ, मह मंदभाइणीए किदे तेलोक्कमंगलस्स वि अप्पणो ण एव्वं अणिट्ठासंकी होउ भवं । (प्रतिहतममङ्गलम्, प्रतिहतममङ्गलम् । महाभाग, मम मन्दभाग्यायाः कृते त्रैलोक्यमङ्गलस्याप्यात्मनो नैवमनिष्टाशङ्की भवतु भवान् ।)

सख्यौ — हद्धि हद्धि परिदावणिव्वेदाणं अदिसओ । (हा धिक् हा धिक् परितापनिर्वेदयोरतिशयः ।)

विदूषकः — वअस्स, तुवं दाव जाए किदे एव्वं उत्तम्मसि, ण जाणीअदि से केरिसी दस त्ति! (वयस्य, त्वं तावद् यस्याः कृते एवमुत्ताम्यसि न ज्ञायते तस्याः कीदृशी दशेति!)

मन्मथः — सखे, तर्क्यत एव, मदनुमानेन प्रियाया अपि परितापातिभूमिः ।

रतिः — [आत्मगतम्] साहु, समत्थिअं पकिदिकोमलेण महाभाएण । (साधु, समर्थितं प्रकृतिकोमलेन महाभागेन ।)

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सख्यौ – किं ण कहिदं अज्जाए वसिणीए पिअसहीपज्जा-उलत्तणं महाभाअस्स ? (किं न कथितमार्यया वशिन्या प्रियसखीपर्याकुलत्वं महाभागाय ?)

[ततः प्रविशति वशिनी]

वशिनी – [स्वगतम्] सम्प्राप्ताऽस्मि केनाप्यलक्षिता कुमारस्य सौधम् । आदिष्टं मे भगवत्या सर्वार्थसाधिकया । यथा, वत्से रतिविरहदूनहृदयं कुमारमन्मथ तदनुराग-ख्यापनेन समाश्वासयेति । (पुरोऽवलोक्य) एष कुमारो नर्मसचिवेन सह किमपि सल्लपन् शयनयष्ट्यास्ते अहो वियोगव्यथापारवश्यमेतस्य !

क्षामापाण्डुवपुः प्रतान्तनयनः प्रत्यूषचन्द्रानन-
श्चिन्ताव्याकुलधीः किमप्यशिशिरा निःश्वासधाराः सृजन् ।
प्रस्वेदी धृत वेपथुः सपुलको रम्याण्यलं विद्विषन्
शून्यं मन्त्रयते वहत्यनुकलं मूर्च्छां पुनश्चेतनाम् ॥ २१

दर्शयाम्यस्मै तावदात्मानम् । [इत्युपसर्पति]

विदूषकः – [विलोक्य] वअस्स, पकिदित्थो होहि । एसा खु अज्जा वसिणी आअच्छइ । (वयस्य, प्रकृतिस्थो भव । एषा खल्वार्या वशिन्यागच्छति ।)

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मन्मथः – [सहर्षम्] कथं प्राप्ता भगवत्याः प्रियान्तेवासिनी वशिनी! [उत्थाय साञ्जलिबन्धम्] आर्ये, स्वागतं भवत्यै। इत आस्यताम्। [सर्वे उपविशन्ति]

विदूषकः – उत्तरीयपल्लवेन चित्रफलकं निह्नुते।

वशिनी – अपि कुशलं कुमारस्य?

मन्मथः – इदानीमार्याया दर्शनेन।

सख्यौ – दिट्ठिआ विट्ठिअकाले उवट्ठिआ अज्जा।
(दिष्ट्योपस्थातव्यकाले उपस्थिताऽऽर्या।)

मन्मथः – आर्ये, इयं हि पङ्कांनिजाङ्गण एव गगनगङ्गालहरीविहृतिः।

वशिनी – कुमार, अनुपपन्ना तावदुत्पन्नसौहृदं जनं प्रत्युपचारोक्तिः।

मन्मथः – आर्ये, अप्युररीकृता भगवत्या मन्त्रिणो वसन्तस्य विज्ञप्तिः?

वशिनी – कुमार, न केवलमूरीकृता भगवत्या, दिष्ट्या च मया तथा संसाधिता यथेदानीं महाभागा,

जानीते न कृताकृतं दिनविधौ तं चाचरत्यन्यथा
पृष्टैकं प्रतिवक्ति चान्यदितरद्दत्ते परं याचिता।
व्यत्यस्तामपि कञ्चुलीं स्तनतटे धत्ते तथाऽलङ्कृतिं
भाति प्रस्तुतसाहितीव सुभगत्वल्लीनचेता रतिः॥ २२

किञ्च —

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ध्यानेनोत्पुलकाङ्गमाकलितया सप्रेम ते वार्तया
स्वैरं दिक्षु दशस्वपि प्रतिमया स्तब्धेक्षणं दृष्टया ।
यामार्धार्धतदर्धतर्कितभवत्सम्प्राप्तिसौख्याशयाऽ-
प्यस्त्यप्रोषितचेतना मृदुतनुर्लावण्यशेषैव सा ॥ २३

रतिः — [स्वगतम्] अणुअंपिदम्हि अज्जाए ।
(अनुकम्पिताऽस्म्यार्यया ।)

मन्मथः — आर्ये, अनेन ते वचनेन सानुरागामस्मासु जानीमो भवत्सखीम् ।

वशिनी — कुमार, न केवलं सानुरागा, सोपतातिशया च । तथाहि,

सक्वाथं चरणार्पणेन सुदृशो वापीजलं क्षीयते
भूयो मर्मरितच्छदं वनलताश्शुष्यन्ति दृग्गोचराः ।
निश्वासश्वसनैर्दलन्ति शतधा केलीमहीभृच्छिलाः
सोऽयं त्वत्परिरम्भणं बत विना तापः कथं शाम्यतु ॥ २४

उपचर्यमाणा च सख्या सुमुखी ब्रवीति —

किं दावेन निषिञ्चसि प्रतिकलं वज्रैःकुतो हंसि मां
व्यालैर्वेष्टयसे कथं निदसे किं खड्गधारास्तरे ।
नेष्टं ते मम जीवितं ध्रुवमुत प्राप्यापि तावत्कृतं
पापायां प्रयतस्व तत्प्रियसखि स्वेच्छानुरूपं मयि ॥ २५

इति

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मन्मथः – धिक् कष्टम्, परां कोटिं गतस्तापः शिरीषकुसुमकुमारैः सुतनोरवयवैः कथं सोढव्य इति व्यथते मे चेतः ।

विदूषकः – वअस्स, मा विहत्थो होउ भवं सोदव्वसेसं वि सुणुमो । (वयस्य, मा विहस्तो भवतु भवान्, श्रोतव्यशेषमपि शृणुमः ।)

वशिनी –

प्रत्युद्याति तवागमभ्रमवशाद्ब्रूते पुनःस्वागतं
सोत्कण्ठं परिरिष्यते चरणयोः सन्नह्यति क्षालने ।
दत्ते चासनमासितुं जनयति द्राक् तालवृन्तानिलं
सा हा हन्त नितान्तरूढविरहक्लान्तान्तरङ्गा सखी ॥ २६

विदूषकः – वअस्स, जितं अम्हेहिं । (वयस्य, जितमस्माभिः ।)

मन्मथः – सखे,

अनुरागातिशयं मयि
ननु बुद्ध्वाऽऽनन्दमग्नमपि तावत् ।
सीदतितरां मनो मे
सुदृशो विरहव्यथां विचिन्त्ये माम् ॥ २७

सख्यौ – पिअसहि, अवि सुदं तुए सोदव्वं, दिट्ठं अ दट्ठव्वं, विण्णादं अ विण्णादव्वं । ता पज्जवट्ठवेहि अप्पाणं ।

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

(प्रियसखि, अपि श्रुतं त्वया श्रोतव्यम्, दृष्टञ्च त्वया द्रष्टव्यम्, विज्ञातञ्च विज्ञातव्यम्?

वशिनी — कुमार, तदेवमन्योन्यानुरक्तयोर्वामवश्यम्भावि समागतः।

मन्मथः — आशीरियमार्यायाः।

विदूषकः — [वारुणीं दिशमवलोक्य] वअस्स, अणुजाणाहि मं संझोवासणस्स। (वयस्य, अनुजानीहि मां सन्ध्योपासनाय।)

मन्मथः — कथमुपनतः सायंसमयः।

[निरूप्य]

आरक्तया नितान्तं
संरक्तस्येह पद्मिनीकमितुः।
स्पृहये दिशा प्रतीच्या
सम्बाधायानुरूपाय॥ २८

विदूषकः — वअस्स, णं उव एत्थ पमदवणलीलाथेरोसणसरम्मि तम्मंतस्स चक्कवाअमिहुणस्स दुप्पेक्खं अवत्थंतरं। (वयस्य, ननु पश्य, अत्र प्रमदवनलीलास्थविरासनसरसि ताम्यतश्चक्रवाकमिथुनस्य दुष्प्रेक्ष्यमवस्थान्तरम्।)

मन्मथः — [विलोक्य, सकरुणम्]

कासारे विसिनीदलैर्व्यवहिते किञ्चिन्मिथो दर्शने
यद्दैन्येन विरौति धावति पतत्यावेपते मूर्च्छति।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तत्तादृग् वत चक्रवाकमिथुनं दीर्घां वियोगव्यथां
नक्तं हन्त नयन्निदं हतविधिर्मुच्येत वाच्यात् कथम् ॥ २९

विदूषकः – [स्वगतम्] किदं णेण वअस्सस्स पुणो वि उक्कंठाकालणेण पसंगेण । (कृतमनेन वयस्यस्य, पुनरप्युत्कण्ठाकारणेन प्रसङ्गेन ।) [प्रकाशम्] वअस्स, उवट्ठाणसमओ खु दे, ता संभावेसु तुज्झ अवसरपडिवालणपरं सअलं सामाजिअं लोअं । (वयस्य, उपस्थानसमयः खलु ते । तत्सम्भावय तवावसरप्रतिपालनपरं [त्वामेव प्रतिपालयन्तं] सकलं सामाजिकं लोकम् ।)

मन्मथः – आर्ये, उपास्या नन्वत्रभवत्याऽपि पितृप्रसूः ।

वशिनी – साधयतु कुमारः समीहितसिद्धये ।

(निष्क्रान्तो मन्मथः सह विदूषकेण)

वशिनी – (विदूषकाङ्कविभ्रष्टं चित्रफलकमादाय, स्वगतम्) अयं हि सस्यनिष्पत्तये क्षेत्रकर्षिणो निधानलाभः, यत्कुमाराश्वासनप्रवृत्तया समासादितः सख्या रत्याः प्राणनोपायः । तदिदं मयूरिकाहस्तेन तस्यै प्रापयिष्यामि । अतिवर्तते मे सन्ध्योपास्तिः ।

[इति निष्क्रान्ता]

रतिः – [निरूप्य] हद्धि, हद्धि! कहं ण दीसइ महाभाओ ?

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

[साश्चर्यम्] पासादो वि हला किं एदं । (हा धिक्
हा धिक्! कथं न दृश्यते महाभागः? प्रासादोऽपि हल
किमेतत्!)

सख्यौ – पिअसहि, किं अण्णं तुह विणोअणप्पउत्तादो भअवईए
पहावदो । (प्रियसखि, किमन्यत्तव विनोदनप्रवृत्ताव
भगवत्याः प्रभावात् ।)

रतिः – [सास्रम्] हला, किं मिच्छासमासासणो वाओ महइमो
(हला, किं मिथ्यासमाश्वासनोपायो ममायम् ।)

[इति मोहमुपगम्य भूम्यां निपतति]

सख्यौ – [विविधं शिशिरोपचारमाचरन्त्यौ सखेदम्]
कहं चिरेण वि एसा सण्णं ण लहइ? किं दाणिं कादव्वं
किं वा एत्थ समस्सासणं होएज्जइ? (कथं चिरेणाप्येष
संज्ञां न लभते! किमिदानीं कर्तव्यम् । किं वाऽ
समाश्वासनं भविष्यति?)

[इति चिन्तां नाटयतः]

[प्रविश्य]

मयूरिका – अज्जाओ, एदं खु भट्टिदारिआपरिदावणिव्वावइत्त
होज्जत्ति अज्जाए वसिणीए मह हत्थे दिण्णं । (आर्ये
एतत् खलु भर्तृदारिकापरितापनिर्वापयितृ भविष्यतीत्यार्य
वशिन्या मम हस्ते दत्तम् ।)

(इति चित्रफलकमर्पयति)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सख्यौ – हंजे साहु समाअरिअं सामिणीए समाराहणं । (रतिं प्रति) पिअसहि, समस्ससिहि, समस्ससिहि । सच्चो एव संजादो दे समासासणोवाओ । (हले, साधु समाचरितं स्वामिन्याः समाराधनम् । प्रियसखी, समाश्वसिहि, समाश्वसिहि सत्य एव संजातस्ते समाश्वासनोपायः ।)

रतिः – (समाश्वस्य) हला, कहिं सो महाभाओ ? (हला, क्व स महाभागः ?

सख्यौ – पिअसहि, एत्थ एव्व संणिहिदो ।
(प्रियसखि, अत्रैव सन्निहितः ।)

(इति चित्रफलकं दर्शयतः)

रतिः – [तदादाय निरूपयन्तो] हला, मह च्चेअ खु एदं चित्तफलअं । (हला, ममैव खल्वेतत् चित्रफलकम् ।)

सख्यौ – आं पिअसहि, दाणिं उण अत्थि एत्थ को वि अंदिसओ । (आं प्रियसखि, इदानीं पुनरस्त्यत्र कोऽप्यतिशयः ।)

रतिः – केरिसो सो? (कीदृशः सः) [इति निपुणं निरूप्य, स्वगतम्) धण्णा खु ममादु एसा पडिकिदी जा महाभाअस्स हत्थफंससंभावणाभाअणं जादा । (धन्या खलु ममैषा प्रतिकृतिर्या महाभागस्य हस्तस्पर्शसम्भावनाभाजनं जाता ।) [प्रकाशम्] हला, अहं दाव आलिहिदम्हि ? (हला, अहं तावदालिखिताऽस्मि ।)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सख्यौ – सोहेइ किदपडिकिदं पिअसहीए तस्स अ महाभाअस्स।
(शोभते कृतं प्रतिकृतं प्रियसख्यास्तस्य च महाभागस्य।)

रतिः – [सौत्सुक्यं मन्मथप्रतिच्छन्दमवलोकयन्ती] कहं एत्थ आणंद बाहुप्पीलो मे पडिपक्खो हुवइ ? (कथमत्रानन्द-बाष्पोत्पीडो मे प्रतिपक्षो भवति ?)

सख्यौ — [रतिप्रतिकृतिं निर्वर्ण्य] अम्हो भावालेक्खकुसुलदा महाभाअस्स जं पुप्पाइं ओचिणन्ती तहरूवेव्व आलिहिदा पिअसही। (अहो भावालेख्यकुशलता महाभागस्य, यत्पुष्पाण्यवचिन्वती तथारूपैवालिखिता प्रियसखी।)

रतिः — [आलेख्यमन्मथं प्रति सोपालम्भम्] अइ हिअअपाडच्चर, णं गदीदोभवं ! (अयि हृदयपाटच्चर, ननु गृहीतो भवान्।)

सख्यौ — [सपरिहासम्] एव्वं वि णाम एदिणा णिव्वुदा होउ पिअसही। (एवमपि नामैतेन निर्वृता भवतु प्रियसखी।)

रतिः — [चित्रफलकं हृदये कृत्वा प्रमोदस्तिमिताऽवतिष्ठते।]

[प्रविश्य]

सारिका — अज्जाओ, एसा खु अज्जू आअण्णिदभट्टिदारिआसरीरोवदावउत्तता इदोमुहं आअच्छइ। (आर्ये, एषा खल्वार्याऽऽकर्णितभर्तृदारिकाशरीरोपतापवृत्तान्ता इतो मुखमागच्छति।)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

रतिः — [ससंभ्रमं गात्रापनीतशिशिरोपकरणा] कहं अज्जू सअं एव्व आअदा ? हला ता अम्ह एव्व अग्गदो भविअ णं संभावेम्ह । (कथमार्या स्वयमेवागता ! हला, तद् आवामेवाग्रतो भूत्वा तां सम्भावयावः ।

[इति निष्क्रान्ताः सर्वे]

॥ द्वितीयोऽङ्कः समाप्तः ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ तृतीयोऽङ्कः ॥

(ततः प्रविशत्यासनस्थः प्रजागरक्लान्तलोचनः किमपि चिन्तयन् वसन्तः)

वसन्तः – (स्वगतम्) अहो महत्त्वपर्यवसायी केवलं मन्त्रिभावः। पश्य,

आशङ्क्यः प्रभुराश्रयोऽप्यवहितेनाराध्यमन्तःपुरं
मान्यस्तत्प्रणयी जनो व्यवसितं ज्ञेयं स्वरन्ध्रैषिणाम्।
सान्त्व्याः शस्त्रभृतः प्रवृत्तिरभितः श्राव्या चरावेदिता
वेद्यौ च व्ययसङ्ग्रहौ बत पदं सौख्याय किं मन्त्रिणः॥ १

(सानुस्मरणम्) सूक्तमिदं नयविदा कविना। यथा,

स राजा यस्त्यक्तव्यसनमखिलां शास्ति जगतीं
स मन्त्री यो राज्ञो हितमथ च लोकस्य तनुते।
स सेनानेता यः समिति भटसाह्याय घटते
स सभ्यो यो वक्ति प्रियमपि सभायां समुचितम्॥ २

अपि च,

यत्रास्ति प्रभुशक्तिमान्न नृपतिर्नीतिप्रवीणो न वा
मन्त्री किञ्च परस्परोपकरणस्निग्धा न सामाजिकाः।
सेनानीर्न जया यथास्मृति वदन् न प्राड्विवाकः कुलो-
त्पन्ना नाधिकृताश्च तत्र सुधियो वस्तुं न राज्ये क्षमम्॥ ३

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

(सविमर्शम्) गृहीतभृतेः किमनतिगताध्वनो विवधभारनिर्वेदन । इदमिदानीमवश्यनिर्वोढव्यमापतितम् ।

यत् किल,

सामान्येन विशेषतश्च नगरीसौधे वने नन्दने
दृष्टायां दृढरूढरागविवशो रत्यां विभुर्मन्मथः ।
तल्लाभाय निरन्तरोपचितया क्रोडीकृतश्चिन्तया
भक्तैरप्यधुनाऽस्मदादिभिरहो भृत्यैर्नसन्तुष्यति ॥ ४

श्रुतं हि भगवत्यन्तेवासिन्या वसिन्याः सकाशाद् रतिरतितरामनुरक्ता स्वामिनि मन्मथ इति । औपयिकस्तावदनयोरन्योन्यव्यतिकरः ।

रज्यत्युत्पलिनी क्व शीतकिरणं हित्वा स वा तां पुनर्वासन्ती सहकारभूरुहमनुप्राप्यौचितीं विन्दति ।
सम्बन्धो नलिनीनिदाघमहसोः श्लाघास्पदं जायते
दाम्पत्यञ्च परस्परानुगुणयोः स्त्रीपुंसयोर्युज्यते ॥ ५

दित्सिता च पितृभ्यां भगवदुपेन्द्रानुप्रहितस्य तत्रभवतो वाचस्पतेर्वाचा रतिः स्वामिने सुमधन्वने । निवेदिता तु मह्यमभितः प्रवृत्त्युपलम्भाय गूढमनुसञ्चरद्भिस्तैरेतत्प्रतिकूलाऽपि वार्ता । यथा, शम्बरासुरार्थे रतिमर्थयितुं तत्पितुरन्तिकं भार्गवान्तेवासी बाष्कलः समाजगाम ।

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तेन च सौम्य कन्याभिमतो वर एवेष्यतेऽसत्कुल इति दत्तनास्तिपर्यायोत्तरो विमन एव प्रतिनिवृत्त इति । अतो दुस्तरशाम्बरीकं शम्बरमसुरमन्तरायं चिन्तयन्न निर्वृणोमि । यदि वा, न हव्यवग्रहसम्भावनया काले नारभ्या कृषिः, सरघाशङ्कया वा मधु नासादनीयम् । निर्वेदमन्तरा वस्तुनि प्रयतमानस्य सिद्धिरविसंवादिन्येव भवति । किञ्च, लोकैकधनुर्धरस्य स्वामिनस्तावदीषत्करः शम्बरनिग्रहः । इदं पुनरन्यद परिहार्यमुपस्थितं कार्यमत्याहितमिव प्रतिभाति । यत् पद्मयोनिवरास्कन्दितविबुधसद्मभिः शूरपद्मादिभिरसुरैः पराजितस्तुषाराट् सुराचार्येणसमं सम्मन्त्र्य दुर्वृत्तनिग्रह-निरवग्रहशक्तेः सेनान्यः प्रादुर्भावाय निश्चितमतिस्तुषार-धरणिभृति कुतोऽपि हेतोस्तपस्यन्तं भगवन्तमन्तकान्तकं शुश्रूषमाणया शैलदुहित्रा संयोजयितुमेतदलङ्कर्मिणे स्वामिन्यनुजतनुजे स्वस्य निधास्यमानभरः सातिशयममून् वासरानस्मिन्नादरं दर्शयति । [विचिन्त्य ससाध्वसोत्कम्पम् ।]

यस्यालीयत कण्ठसीम्नि सहसा हालाहलं दुस्सहं
दर्पान्धस्त्रिशिखेन्धकोऽपि चरणाङ्गुष्ठे स लङ्केश्वरः ।
वैधात्रं च शिरःकरे क्रुधि यमो हासे पुराणां त्रयं
तेजोराशिरसौ कथं नु भगवान् जय्यो ललाटेक्षणः ॥ ६

(विमृश्य) धिक् कष्टस्तावदनुजीवित्वेऽपि शस्त्राजीवभावः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

महोत्सेधः सौधो मधुरवयसः सारसदृश-
स्तथाऽपत्यं हृद्यं तुलितनरवाहश्च विभवः ।
वपुः सल्लावण्योदयमधिगतारोग्यमथ च
क्षणेनैव स्वीयं न हि विधृतशस्त्रस्य किमपि ॥ ७

अथवा, किमनयाऽनिष्टशङ्कया मे । परदेवताप्रसाद एव स्वामिनः श्रेयः समग्रयिष्यति । (दिशोऽवलोक्य) अहो, निरन्तरयाऽनयेव चिन्तया मे प्रभाता विभावरी । अधुना हि,

वरुणस्य दिशि प्ररूढरागं पतिमालोक्य रुषेव रात्रिरेषा ।
विजहाति हि तारहारभूषां ननु सापत्न्यकमक्षमा निदानम् ॥

किञ्च,

दूरोत्क्षिप्तमिवैतदम्बरतलं दीर्घा इवेमा दिशो
विस्तीर्णेव वसुन्धरा सरणयः प्रत्यग्रसृष्टा इव ।
चक्षुष्मन्त इवाधुना तनुभृतः प्राप्ते जगच्चक्षुषि
प्राचीनं धरणीधरं नवमिवाशेषं जगद्भासते ॥ ९

जाने तावत्,

निद्रामन्थरतारसंसविगलद्धम्मिल्लभारं स्तन-
प्रभ्रश्यद्वसनाञ्चलं दरगलन्नीवी स्फुरज्जृम्भिकम् ।
उत्कूजन्मणिभूषणश्च शयनादुत्थातुकामश्शनै-
रेणाक्ष्योऽद्य भ्रमेधयन्ति सुरतोत्कण्ठां पुनःप्रेयसाम् ॥ १०

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

(साश्चर्यम्)

नक्तं प्राप्तदशा विपर्ययममी संत्यज्य पद्माकरं
याताः स्वैरमसंस्तुता इव पुनः क्वापि द्विरेफादयः ।
सम्प्रत्येष दलत्सरोजसुभगः सम्भूय तैःख्यापित-
स्वातन्त्र्यैरुपभुज्यते ननु जनः सर्वः श्रियो बान्धवः ॥ ११

सम्प्रत्यहमपि निवर्तितसान्ध्यविधिः प्रतिपालयामि स्वामिन उपस्थानसमयम् । (इत्यभ्यन्तरं प्रविशति)

(प्रविश्य)

कञ्चुकी — (सनिर्वेदमात्मगतम्) धिग्जन्म परपिण्डोपजीविनाम् ?

यद्वश्येन्द्रियवर्गता दृढतरो यश्चेतसः संयमो
यन्निद्राशनयोर्मितिर्यदपि वा भोगेषु नातिस्पृहा ।
यच्चान्तःपुरचारिणां प्रतिकूलं हा संशयः प्राणने
यद्येतद् भविता निवृत्तिविषये कोऽन्योऽस्तु धन्यस्ततः ॥

(साधिक्षेपम्) अलमात्मम्भरेस्तावद् भस्मशायिनः शुन इव क्षणमनेन मे बोधाभासेन । यावदनुतिष्ठामि स्वामिन आदेशम् । (अग्रतोऽवलोक्य) इदममात्यवसन्तभवनम् । (प्रवेशं नाटयन् सर्वतश्चक्षुः प्रचार्य) अहो, अधिकार-गौरवं मन्त्रिणः ।

सभ्यास्तावदितो वसन्त्यधिकृताः सर्वे स्वदन्ते ह्यतः
सेनान्यस्त्विह भान्ति सन्ति शतशश्चात्रापि दूत्ये रताः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अन्यैः कार्यवशागतैश्च सुतरां वाह्याङ्गणं सङ्कुलं
साम्राज्यं सचिवो बिभर्त्यधिभुवः श्वेतातपत्रं विना ॥ १३

(अनिवारित एव कक्ष्यान्तरगतं वसन्त मुपसृत्य सप्रणामम्)

अमात्य, पुरुहूतमाहूतः स्वामी तत्रभवन्तं दिदृक्षते ।

वसन्तः — भद्र, सज्जा एव वयं त्वत्प्रतीक्षाः स्मः । (इति कञ्चुकिना सह निष्क्रान्तः)

(शुद्धविष्कम्भः)

(ततः प्रविशति वसन्तेनानुगम्यमानो मन्मथो मितश्च परिजनः)

मन्मथः – (आत्मगतम्) अये, न मनीषितसमयसुलभानि श्रेयांसि नाम । यन्मां रतिश्च परस्परानुरक्तौ श्रुतवता गुरुजनेन निश्चितेऽप्यचिरनिर्वर्तनीये पाणिग्रहणमङ्गले तावदिदमावश्यकममरकार्यमापतितम् ।

अतश्च,

एकतः स्वामिसत्कारैः परतः प्रेयसीगुणैः ।
कृष्यमाणमिदं द्वेधा मम डोलायते मनः ॥ १४

(सखेदम्) भवतु मन्दभाग्यस्य मन्मथस्यैवमुपतापनैरन्तर्यम् । मम कृते नितान्तदूयमानस्वान्तां पुनः कान्तामनुस्मृत्य सन्तापमनुभवामि ।

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

दक्षा वा दवपात्रकोष्मसहने दीना कुरङ्गाङ्गना
वार्तायामपि वैद्युतस्य महसः का हन्त वासन्तिका ।
पात्रं कैरविणी निदाघमिहिरक्रूरातपस्यापि किं
सोढैतस्य कथं मुहूर्तमपि वा विश्लेषतापस्य सा ॥ १५

(विमृश्य) का नाम परवतः सुखाभिलाषिताऽपि ?
(प्रकाशम्) मन्त्रिन् पूर्वेद्युर्निशीथिन्यामधिगते तातस्य मरुत्वतश्चिकीर्षिते कथमद्य प्रातरेवामुष्य स्मरणीयोऽसि ?

वसन्तः — स्वामिन्, अदीर्घसूत्रता हि कर्तव्येषु प्रभविष्णूनामर्थसिद्धेरवश्यम्भावः । अपि तु, सम्भावितानर्थेऽस्मिन्नर्थे स्वामिनं नियुयुक्षमाणेन सहस्राक्षेण स्वार्थपरता केवलमाविष्कृता ।

मन्मथः — मन्त्रिन्, नैवमवगन्तव्यम् ।

उक्तमनुक्तं वा ननु साध्यं वाऽसाध्यमीश्वरस्य कृते ।
अर्हं यदि वाऽनर्हं कार्यं कार्यहितेन भृत्येन ॥ १६

किञ्च,

वाहा गन्धवहातिशायि तरसा दानोद्धुराः सिन्धुरा
वित्तं स्वाश्रितदैन्यहारि सरसा भोगाश्च भोगाश्चिरम् ।
मानश्चातिशयीति लभ्यमखिलं यस्मादिह स्वामिन-
स्तस्यार्थेऽप्यनुजीविभिः कियदिदं त्याज्या यदेषा तनुः ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

वसन्तः — (सविनयम्) साधु समनुशिष्टं स्वामिना ।

मन्मथः — (परिक्रम्य) इदं तावन्माहेन्द्रं मन्दिरं यावत् प्रविशामि ।

[इति वसन्तेन सह प्रवेशं नाटयति]

वसन्तः — (सभां निर्वर्ण्य साद्भुतं स्वगतम्)

इतो देवैः सर्वैरिह पितृभिरत्रर्षिभिरितः
फणीन्द्रैर्भूपालैरिह इह च गन्धर्वपतिभिः ।
इतो रम्भाद्याभिर्ललितललनाभिः सुतनुभिः
सुधर्मा निर्भाति प्रमदमधिकं मे नयनयोः ॥ १८

(पुरोऽवलोक्य) एष देवो महेन्द्रः सर्वैः सुपर्वभिर्यथोचित-
मुपास्यमानो वाचस्पतिना सह सल्पन् सिंहासनमध्यास्ते ।
(सबहुमानम्) अहो, महाभाग्यमेतस्य !

स्वाराज्यं त्रिदिवपत्तनराहिभुवनोत्तंसीकृताज्ञाक्षरं
सम्पत्तिः स्ववशीभवत्सुरगवीचिन्तामणिस्वर्द्रुमा ।
किञ्चापूर्णशताश्वमेधयजनैर्दुःसाधमेवं पदं
कस्यैतादृगपौरुषेयवचनोद्गीतं यशश्चैधते ॥ १९

(ततः प्रविशति यथानिर्दिष्टो महेन्द्रो विभवतश्च परिवारः)

महेन्द्रः — (उपनमन्तं मन्मथमवलोक्य, वाचस्पतिं प्रति) भगवन्,

शतशोऽपि दृष्टविजयं
सर्वासाध्याय कर्मणेवत्सम् ।
आदिशतो गिरिशे मे
यत्सत्यं किमपि शङ्कते चेतः ॥ २०

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

वाचस्पतिः— सदृशमीदृग्वचस्तेऽनुजनन्दने वात्सल्यस्य । अथ च दुरासदो भगवान् पुराणामरातिः । अपि तु, सूच्यते करगता कार्यसिद्धिरमुष्य समुत्साहेन । तन्निर्वृणोतु भवान् ।

वसन्तः — (निरूप्य ससम्भ्रमम्) स्वामिन्नेष देवो महेन्द्रः स्वाभावनिर्निमेषैरपि स्तिमितोदञ्चिततारकतया प्रेमातिशयं पिशुनयद्भिः सहस्रेणापि लोचनैरापिबन्निव स्वामिनमवलोकते । (मन्मथः सरभसमुपसृत्य वाचस्पतिमहेन्द्रौ प्रणमति)

उभौ — (सस्नेहगौरवम्) विजयतां भवान् ।

मन्मथः — (महेन्द्रहस्तलननिर्दिष्ट आसने समुपविश्य वाचस्पतिं प्रति) भगवन्, भ्रूकिङ्करीभूतभूर्भुवःस्वस्त्रितयप्रवीरस्य निरन्तरोर्जस्वलनिजतेजोऽनलशलभायितससंरम्भजम्भनमुचिविरोचनपुलोमबलवृत्रादिशात्रवनिकरस्यापि तातस्य कुलिशायुधस्य किमर्थमयं स्मृतिकर्मीभूतो नियोज्यकोटिचरमकोटि निवेष्टेजनः ।

वाचस्पतिः— (सपरितोषम्) कुमार, समुचितैव भवतो ज्यायसि पितरि विनयातिशयमेदुरा गिरां परिपाटी तावदियम् । अपि तु—

वैजयन्तो जयन्तोऽथ शचीगार्हस्थ्यसम्पदे ।
अस्य त्रैलोक्यराज्यश्रीर्भवद्वीर्यनिबन्धना ॥ २१

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पश्य,

चक्रं तत् क्रमते न यत्र घटते दम्भो न दम्भोलिगः-
पाशो नेङ्गति पाशिनः पितृपतेर्दण्डो न चोद्दण्डति ॥
दुस्साधे ननु यत्र कर्मणि भवन्मुक्तैः प्रसूनैः शरै-
रेकद्वैरपि शान्तशात्रवमदो वृत्रारिरानन्दति ॥ २२

मन्मथः — (सव्रीडमिव) भगवन्, प्रभवन्ति हि प्रभवो भृत्यवहूपकरणे।

किन्तु —

पुरस्कृतस्यात्मसमानसन्निधौ
निजोपजीव्येन विधेयगौरवात् ।
भवेदसंसाधितवस्तुनो न किं
हियेऽर्थवादोऽपि कुलप्रथाजुषः ॥ २३

महेन्द्रः — वत्स, अनितरसाध्यतया त्वमेव सकललोकशिवङ्करे कर्मणि समुत्सृष्टवात्सल्यं नियोक्तव्योऽसि ।

मन्मथः — [सप्रश्रयम्] तात, अनियन्त्रणनियोगो हि स्वामी नियोज्येषु ।

किं वा ते परिपन्थिनां युधि शरैर्दर्पोद्धुरं शायये
कस्याद्य क्रियतां चिराय विषयव्यासक्तमन्तर्मुनेः ।
आकीटात् पुनरासरोरुहभवात्को वा शक्यं न मे
ताताज्ञापय मा चिरं किमधुना कुर्यामहं त्वत्प्रियम् ॥ २४

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

महेन्द्रः — वत्स, शिवयोरपत्येन समुत्पत्स्यमानेन सुनिग्रहाः श्रूयन्ते शूरपद्मादयः सर्वे सुरवैरातयः। अतस्तथा प्रयत्यतां वत्सेन यथा प्राञ्चौ दम्पती क्षणमप्यसोढविरहमन्योन्यं संयुज्येयाताम्।

मन्मथः — तात अपि दंशमशकम्, अपि वीरुद्द्रुमं संयोजतस्तातनियोज्यस्य कियदेतन्नाम यत्पुनः स्त्रीपुंसौ लब्धसन्निकर्षौ संयोजयितव्याविति।

महेन्द्रः — [सानन्दम्] वत्स, एवं प्रभाव एव भवान्। किन्तु दुःसहतेजसि निटिलेक्षणे वत्सेन भृशमवहितेन भवितव्यम्।

मन्मथः — यथा नियोजयति तातः।

वाचस्पतिः— कुमार, प्रशस्तमिदं विजयप्रयाणाय धनुर्लग्नं पश्यामः।

मन्मथः — (सोल्लासम्) भगवन्, एष सज्ज एवास्मि। [इत्युत्तिष्ठति]

महेन्द्रः — (सगौरवम्, स्वाङ्गावतारितानि दिव्यान्याभरणानि वासांसि च मन्मथाय वितीर्य)

साधय साधय कार्यं
सौपर्वं भवतु ते शिवः पन्थाः।
वितरतु सा कल्याणी
कल्याणं वत्स सम्प्रयातस्य॥

मन्मथः — (सप्रणामं वसन्तेन सह निष्क्रान्तः)

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

महेन्द्रः — भगवन्, ईदृशे कर्मणि वत्सं नियुञ्जानोऽसन्निहितं सम्प्रत्यश्राविंतवृत्तान्तं चानुजन्मानमुपेन्द्रं किं वा प्रतिवक्ष्यामि?

वाचस्पतिः— महेन्द्र, अभिमतं हि भगवतोऽप्युपेन्द्रस्य तदिदमखिल-भुमनभद्रङ्करं कार्यम् । अथ पुनरेतादृश एव निर्ममो राज्ञां धर्मः ।

भृत्यो यदि वाऽमात्यो भ्राता वा भ्रातृजः स्वपुत्रो वा ।
यो यत्र कर्मणीष्टे तस्मिन् राज्ञा ह्यसौ नियोक्तव्यः ॥ २६

(नेपथ्ये महान् कलकलः)

वाचस्पतिः— (श्रुत्वा) महेन्द्र, यथाऽयं तूर्यकाहलीशङ्खदुन्दुभिस्वनोन्मिश्रः कोलाहलः समुज्जिहीते तथा तर्कयामि कुमारस्य सेनया सन्नद्धया भवितव्यम् ।

महेन्द्रः — कः कोऽत्र भोः ?

[प्रविश्य]

दौवारिकः— [सप्रणामम्] देव, अयमहम् ।

महेन्द्रः — भद्र, समादिश्यन्तां जङ्घाकरिकाश्चाराश्च, प्रस्थितस्य वत्सस्य प्रवृत्तिः प्रतिकलमानेतव्येति ।

दौवारिकः— यदाज्ञापयति देवः । [इति निष्क्रम्य जाङ्घिकाभ्यां सह प्रविश्य] देव, कुमारमनुप्रहितेषु वार्ताहरेषूपावृत्ताविमौ ।

[जङ्घाकरिकौ प्रणमतः]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

महेन्द्रः — (दौवारिकं प्रति) भद्र, त्वमेवमेव नियोगमनुतिष्ठ ।

(दौवारिको निष्क्रान्तः)

वाचस्पतिः— (जाङ्घिकौ प्रति) कथयतं यथादृष्टं कुमारस्य प्रस्थानवृत्तम् ।

प्रथमः — (साञ्जलिबन्धं संस्कृतमाश्रित्य) अवदधातु देवः । देव, गृहीतदेवनिदेशे पुनरप्रविष्टनिजभवनमप्रतिपालितानुयात्रिकं चाधिरूढयानके शूरे कुमारे नगरान्निष्क्रामति मन्त्रिणां वसन्तस्य दृक्पातमात्रप्रधावितैर्वेत्रपाणिभिः संत्वर्यमाणायां कृताकृतसन्नाहमभिपतन्त्यां पृतनायाम् —

मदामोदभ्राम्यन्मधुकरकुलैर्दन्तिपटलै
रुदङ्घ्रित्वङ्गद्भिर्जितपवनवेगैश्च तुरगैः ।
शताङ्गैरुत्तुङ्गैर्विलसदसिखेटैरपि भटै-
र्धरित्री द्यौराशान्तरमपि तिरोधायि सकलम् ॥ २७

महेन्द्रः — अस्तु तावदेतत्सकलमहेश्वरसाधारणम् । निवेदयतं वत्सविजयमूलस्य मौलस्य बलस्य समारम्भम् ।

द्वितीयः — सुणादु देव्वो । (शृणोतु देवः)

मलअ समीरो माहवणिसा णिसेसो अ सुअपिअलिल्ला ।
मोरा कलहंसा सुरसारसणेत्ता अ सरहसं चलिआ ॥

मलयसमीरो माधव
निशा निशेषश्च शुकपिकभ्रमराः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मयूराः कलहंसाः
सुरसारसनेत्राश्च सरभसं चलिताः ॥ २८

महेन्द्रः – [सस्मितम्] भगवन्, संगृहीतमनेन ।

वाचस्पतिः– भद्रौ, सविशेषं वर्णयतम् ।

प्रथमः –

आलिङ्गन् नवमालिकामपनयन् यूनोः श्रमाम्भःकणा-
न्भृङ्गीनामपि शिक्षयन्नविकलां सङ्गीतभङ्गीं कलाम् ।
चौलीमौलिपिनद्धमुग्धवकुलस्रग्गन्धमुष्टिन्धयः
श्रीखण्डाचलबान्धवो विवलते धीरः समीरः पुरः ॥ २९

वाचस्पतिः– नासीरवीरः खल्वेष कुमारस्य ।

महेन्द्रः – ततस्ततः ।

द्वितीयः – देव्व, णवरि अ, (देव अनन्तरम्,)

पासादसअणसुहआ पसण्णचंदा पमंदगंधवहा ।
संभिअजुवलीलाओ सुरहिणिसओ समुग्गआ सरसा ॥

प्रासादशयनसुभगाः
प्रसन्नचन्द्राः प्रमन्दगन्धवहाः ।
सम्भृतयुवलीलाः
सरभिनिशाः समुद्गताः सरसाः ॥ ३०

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

प्रथमः –

जीवातुस्त्रिदिवौकसां जलनिधेर्मेदस्करो मानिनी-
मानोन्मूलनकार्मणं कुमुदिनीहासैकवैहासिकः ।
ध्वान्तोच्चाटनमान्त्रिकोऽम्बरसरस्सीमा मरालो जग-
न्नेत्रानन्दरसायनं विजयते राकानिशाकामुकः ॥ ३१

वाचस्पतिः– प्रियसुहृत् किलासौ कुमारस्य ।

महेन्द्रः – ततस्ततः ।

द्वितीयः – तदो अ, (ततश्च)

पक्खेहिं हरिदेहिं पवालसरिसेण चंचुभाएण ।
पमदालावकलाहिं पमदं कीरा कुणंति कूजाहिं ॥

पक्षाभ्यां हिताभ्यां
प्रवालसदृशेन चञ्चुभागेन ।
प्रमदालापकलाभिः
प्रमदं कीराः कुर्वन्ति कूजाभिः ॥ ३२

प्रथमः –

उत्तालाः कुरुविन्दपाटलदृशामुन्निद्रनीलोत्पल-
स्निग्धानां सहकारपल्लवलवग्रासोल्लसच्चेतसाम् ।
उन्मीलन्ति समन्ततः श्रुतिःसुखाः स्पष्टीभवत्पञ्चमाः
स्वच्छन्देन कुहूः कुहूरितिमुहुः रम्याः पिकानां गिरः ॥ ३३

वाचस्पतिः– एताः खलु कामुकमनोमृगाकृष्टिकिरातगीतयः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

महेन्द्रः – ततस्ततः ।

द्वितीयः – देव्व, अणंतरं अ । [देव, अनन्तरं च]

महुरसपाणपमत्ता महुरं परिदो वि झंकुणंतीओ ।
वम्महबलसामग्गीवड्ढणकुसला भमंति भमरीओ ॥

मधुरसपानप्रमत्ताः
मधुरं परितोऽपि झं कुर्वन्त्यः ।
मन्मथबलसामग्री
वर्धनकुशला भ्रमन्ति भ्रमर्यः ॥ ३४

प्रथमः —

बर्हैः केरलकामिनीकचरुचामर्धैश्चमूमुल्लास-
न्मायूरातपवारणोच्चयपरिष्कारं समातन्वती ।
केकाभिर्जयकाहलीसमधुराग्रीवोद्गताभिर्मुहु-
र्दिक्चक्रं निरुणद्धि मुग्धनटनोदारा मयूरावलिः ॥ ३५

वाचस्पतिः– वेधसः सृष्टिवैचित्र्यसमष्टिर्नन्वेषा ।

महेन्द्रः – ततस्ततः ?

द्वितीयः – देव्व, णवरि अवि, (देव, अनन्तरमपि)

पअडिअचामरसोहा पक्खेहिं सोणचंचुचलणंता ।
गमणोवदेसगुलुणो तरट्ठिआणं पुरट्ठिआ हंसा ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

प्रकटितचामरशोभाः
पक्षाभ्यां शोणचञ्चुचरणान्ताः ।
गमनोपदेशगुरव
स्तरुणीनां पुरःस्थिता हंसाः ॥ ३६

प्रथमः —

तत्तादृक्कुशिकात्मजव्रतनिधिध्यासेधिका मेनका
दासीभूतपुरूरवास्त्रिभुवनेऽप्यन्यादृशी चोर्वशी ।
लङ्कानायकशापमूलललितारम्भा च रम्भाहृत-
स्थेमा किञ्च तिलोत्तमा दितिजयोः सुन्दोपसुन्दाख्ययोः ॥

एताभिः पुनरन्येन च सुखारस्त्रैणेन —

खेलत्कुण्डलमाकुलाकुलमणीहारं क्वणत्कङ्कण-
श्रेणीनूपुरमेखलं चलकुचं वल्गन्नितम्बस्थलम् ।
अन्योन्यं मणिदण्डिकाहतिवलन्नेत्रारविन्दाश्चलं
प्रक्रान्तं यमिनो मनोऽपि हरते हल्लीसकक्रीडितम् ॥ ३८

वाचस्पतिः - अमोघान्यस्त्राणि तावदमूनि कुमारस्य ।

महेन्द्रः - (सोल्लासम्) सम्प्रति कतरस्मिन् प्रदेशे कुमारः ?

द्वितीयः - देव्व, कोसमेत्तव्ववहिदे गिरिसस्समे कुमालेण अब्भणुणादा अम्हे खु पडिणीवुत्ता । (देव, क्रोशमात्रव्यवहिते गिरिशाश्रमे कुमारेणाभ्यनुज्ञातावावां खलु प्रतिनिवृत्तौ ।)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

वाचस्पतिः – (उभाभ्यां वीटिकां प्रदाय) भद्रौ, विश्राम्यताम् ।

(जाङ्घिकौ निष्क्रान्तौ)

महेन्द्रः – भगवन्, स्थाण्वाश्रमस्य सन्निहितं (वत्समुपश्रुत्य) किमपि व्यथते मे हृदयम् ।

वाचस्पतिः– महेन्द्र, एतादृगेव ममतास्वभावः । भयस्थानञ्च भगवतो भूतपतेराश्रमः ।

[प्रविश्य पटाक्षेपेण]

प्रतिहारी – देव, दीयन्तामितश्चक्षूंषि । एष खलु,

चूषन्नम्भांसि सिन्धोः सपदि विदलयन्नश्मनो भूधराणां
कुर्वन्नुर्वीं वशुष्कक्षितिरुहनिवहां द्यां विशीर्णां वितन्वन् ।
ज्वालाभिः प्रोज्ज्वलाभिः किमपि चटचटात्कारिणीभिःसमन्ता-
द्रुन्धानो वैधमण्डं हरिति धनपनेरेधने हव्यवाहः ॥ ३९

महेन्द्रः — (साशङ्कम्) भगवन्, नूनमनेनातिशयिततेजोऽनन्तरोष्मणा-शुष्मणा त्रिलोचनविलोचनोद्गनेन भवितव्यम् । किमवस्थां मे वत्स स्यात् । (इति वैक्लव्यं नाटयति)

वाचस्पतिः – महेन्द्र, कुतः स्त्रैनैव वितर्केण पर्याकुलो मुह्यसि ? मयाऽपि दृष्टसामुद्रिकलक्षणो दीर्घायुषः कुमारस्य कथं घटेत तावदत्याहितशङ्काऽपि ।

[नेपथ्ये]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

वियदध्वचारिणः सिद्धाः अहो भगवत्याः सर्वार्थसाधिकायाः सर्वपथीना मन्मथश्रेयः साधकता ।

दृष्ट्वा मन्मथमात्तकार्मुकशरं क्रुद्धस्य यावत्पुर-
द्रोग्धुश्चक्षुरुदञ्चितो हुतवहः क्रोऽप्यापतत्यञ्जसा ।

(इत्यर्धोक्ते)

महेन्द्रः – (सोद्वेगम्) भगवन्, किंपर्यवसानो भविष्यति वा वाक्यशेष इति प्रमुग्धोऽस्मि ।

वाचस्पतिः – महेन्द्र, कृतमनिष्टैकशङ्किना वात्सल्येन । श्रेयः साधकता यावदापतति वाक्याभ्यां शुभोदर्क एवैष प्रतीयते ।

(पुनर्नेपथ्ये)

आविर्भूय तदा सलीलममृतेश्वर्या विधूतस्मयः ।
प्रत्यावृत्य पुनः स्वयं स हि निजे स्थाने समालीयत ॥ ४०

वाचस्पतिः – महेन्द्र, इदानीमपि तावद् विस्रब्धो भव ।

महेन्द्रः – (हर्षातिशयमभिनयन्) भगवन्, सिद्धवचनमेतच्छ्रद्धेव । कुतस्तु पुनः कुमारसकाशाच्चिरायापि चरयोरनागमनम् ।

वाचस्पतिः – (प्रश्नाक्षराणि गणयित्वा) महेन्द्र, सन्निहितावेव जानीहि चरौ ।

[ततः प्रविशतश्चरौ]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

प्रथमः — (संस्कृतमाश्रित्य) वर्धतां देवः ।

द्वितीयः — कुमालवम्महविअएण । (कुमारमन्मथविजयेन)

प्रथमः — देव, अयं च मन्त्रिणा वसन्तेन भगवते वाचस्पतये लिखतेः कर्मीकृतो लेखः । (इति पत्रिकासम्पुटं पुरतो निधायापसर्पति)

महेन्द्रः — (वाचस्पतिमवलोकते)

वाचस्पतिः— (गृहीत्वा सम्पुटमुद्धाट्य पत्रिकां वाचयति) स्वस्ति समस्त-सुरमस्तकमणिस्तोमदीधितिपुञ्जरञ्जितचरणेभ्यो गुरुचरणेभ्यो-ऽन्तेवासिनो वसन्तस्य निटिलतटस्पृष्टभूतलं प्रणतयस्त-दनन्तरा च विज्ञप्तिः । कुशलमत्र तत्रभवतां च, तन्नः सन्देश्यम्, वेद्यञ्च । निवेदितचरः स्यादाराध्यचरणेभ्यो जङ्घाकरिकाभ्यामनुहिमवदुपत्यकमस्मदीयस्कन्धावारविनिवेशः ।

ततःश्चानुसायमुदञ्चता चकोरकुटुम्बसौहित्यनाडिन्धम-चन्द्रिकापूरपरिपूरितहरिदन्तरेण निजसखसाहायकनिस्तन्द्रेण चन्द्रेण निरन्तरफुल्लसन्तानकहरिचन्दनमन्दारप्रभृतिवृन्दार-कतरुवृन्दकुसुमसौरभसारभरस्तेयधीरेण मलयसमीरेण निखिलप्रपञ्चवञ्चनचणपञ्चमस्वरप्रपञ्चनसमुत्सुकैः पिकैः अमन्द-मकरन्दरसनिष्यन्दमधुरीमधुरीणझङ्कृतिपरैर्मधुकरैरुल्लसितभ्रू-वल्लिवेल्लितमुत्तरङ्गापाङ्गविभ्रममधरकिसलयविसरन्मन्दहास-मनुकलतरलताटङ्कमणिविभाविभासितगण्डमण्डलमीषदपसर-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

दुत्तरीयाञ्चलस्फुटोपलक्ष्यमाणवक्षोजतटप्रेङ्खोलितमौक्तिकहार-
माविष्कृताङ्गहारमुत्क्वणत्कनककङ्कणश्रेणिसमधिकवल्गन्नि-
तम्बबिम्बवाचालकाञ्चीगुणकिङ्किणीकमुन्मिषन्मञ्जुलमञ्जीर-
शिञ्जितमङ्गीकृतमधुरसङ्गीतलास्यमकिञ्चिदुदञ्चितकिलि-
किञ्चितविवशीभवदकिञ्चनशमधनान्तःकरणैरप्सरोगणैश्च
परित्याजितयमनियमादिक्रियापरिश्रमं श्रीमतः श्रीकण्ठस्याश्रमं
यावदाबद्धपरिकरःप्रविशति कुमारस्तत्रान्तरे (इत्यर्द्धोक्ते)

महेन्द्रः — भगवन्, भगवतो भर्गस्य कोपानलप्रशमादुत्तरं सन्दर्भं वाचय ।

वाचस्पतिः – (तथा करोति] अथ च भगवन्,

नयनार्चिषा विजेतुं
ननु मामुदयुङ्क्त धूर्जटिरिति द्राक् ।
शूरस्तं हि विजिग्ये
स्मरश्शिवायाःकटाक्षविशिखेन ॥ ४१

महेन्द्रः — (सोल्लासम्) समुचितं हि कृतप्रतिकृतं वत्सस्य । ततः ।

वाचस्पतिः – अनन्तरं च तत्रभवन्, अन्तिकजुषि शैलदुहितरि जनितरागातिभूमेरिन्दुचूडस्य सन्देशादुमां वरीतुमुपनतान् वसिष्ठादीन् मुनीन् वरिष्ठानभिनन्दता गिरीन्द्रेण समहोत्सवमोषधिप्रस्थं नगरमानीय यथाविधि प्रतिपादितायां देव्यां निजनिवासं कैलासमासेदुषः सविलासमुपसेदुषश्च

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

शुद्धान्तमन्तकजेतुरनुमतः कुमारमन्मथकर्तृकः सेवाविधिः । श्रूयते चैत्रमिदानीम्,

सोत्कण्ठं नयनैस्त्रिपञ्चभिरपि प्रत्यङ्गमुद्वीक्षिता
संश्लिष्टा दशभिर्भुजैश्च नवयोर्वक्षोजयोःपेशलम् ।
आपीताधरपल्लवे च सदयोल्लासं मुखैःपञ्चभिः
पत्युः प्रीणयते मनोऽनुरहसे हृष्टा गिरेर्नन्दना ॥ ४२

विज्ञाप्यते च प्रिय सहचरीं विजयां द्वारीकृत्य भक्तजनेन भवानी । यथा —

मा देहि द्वार्यनुज्ञां क्षणमिव सविधाभ्यागमे पश्य मा तं
मा सम्भ्राम्य प्रणामेऽप्यनुनयवचसा मा स तावत्प्रसीद ।
पत्यौ शीतांशुमौलौ ननु जननि सकृन्मानमादत्स्व सोऽयं
वेत्तु त्वत्प्रसादुपात्तं जगति तनुभृतां प्रार्थना भङ्गखेदम् ॥ ४३

तदित्थमत्र भवदनुग्रहेण संसिद्धात्मनिदेशस्य कुमारस्य विजयेनाभिनन्द्यो देवो देवाधिराजः । उदन्तशेषस्तु कुमारमन्मथेन सन्दिष्टश्चारमुखादवगन्तव्य इति ।

महेन्द्रः — [सानन्दबाष्परोमाञ्चम्] प्रियं नः, प्रियं नः ।

वाचस्पतिः— भद्रौ, वाचिकं निवेदयतम् । -

प्रथमः — देव, विज्ञप्तं हि कुमारेण यावदभ्यनुज्ञामिहैव पितृष्वसुरन्तिके निवसःसन्नागमिष्यामि तातचरण चरणारविन्दमूलमिति ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

द्वितीयः — देव्व, लद्धकुमाराणुण्णेहि केलासादो पडिणिवुत्तेहि वोसहिपत्थस्स पुरस्स बाहेरपमदवणपेरन्तपाअवच्छाआए विस्समंतेहि अम्हेहि अण्णं विअच्चंपिअं आअण्णिअं। (देव, लब्धकुमारानुज्ञाभ्यां कैलासात् प्रतिनिवृत्ताभ्यामौषधिप्रस्थस्यपुरस्य बाह्यप्रमदवनपर्यन्तपादपछायायां विश्रम्यद्भ्यामावाभ्यामन्यदप्यत्यन्तप्रियमाकर्णितम् ।)

महेन्द्रः — [सौत्सुक्यम्] कीदृशं तत् ?

द्वितीयाः — तत्थ जदिच्छाए संणिहिदाणं विस्संभादो अण्णुण्णमालवतीणं तत्तहोदीए पव्वद सव्वभोमधरसामिणीए मेणाए परिआरिआणं पुढमाए भणिदं । जह, पिअसहि इमेसु दिअहेसु समुप्पण्णदोहिलाए अम्हाणं भट्टिदारिआए समुइदाइ एदाइं सहआरजंबीरखज्जूरदाडिमांइति पुच्छिदं अ अवरिज्जाए । हला, अवि सच्चं गुव्विणी संवुत्ता भट्टिदारिअ त्ति? उत्तरिदं अ पुढमाए एव्वं, सहि को एत्थ संसओ, हिओ किल केलासादो विअ अणुप्पेसिदसमाअदाए हरणचेडीए भट्टिणीस आसे भट्टिदारिआदोहिललक्खणाइं अणुव्वण्णिदाहं । जह —

आपंडुदुब्बलमुही
ठुलठ्ठु लग्गणीलसहणभरा ।
किसदा मिमुक्कमज्झा
सिढिलिअसव्वंगभूसणा गोरी ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

(तत्र यदृच्छया सन्निहितयोर्विस्रम्भादन्योन्यमालपन्त्योस्तत्र-भवत्याः पर्वतसार्वभौमगृहस्वामिन्यामेनायाः परिचारिकयोः प्रथमया भणितम् । यथा, प्रियसखि, एषु दिवसेषु समुत्पन्नदौहृदाया अस्माकं भर्तृदारिकायाः समुचितान्येतानि सहकारजम्बीरखर्जूरदाडिमानीति पृष्टश्च द्वितीयया । हला, अपि सत्यं गुर्विणी संवृत्ता भर्तृदारिकेति ? उत्तारितश्च खलु प्रथमया एवम्, सखि, कोऽत्र संशयः ? ह्यः किल कैलासाद्विजयानुप्रेषितसमागतया हरणचेट्या देवी-सकाशे भर्तृदारिकादौहृदलक्षणान्यनुवर्णितानि । यथा—

आपाण्डुदुर्बलमुखी
स्थूलस्थूलाग्रनीलस्तनभरा ।
कृशताविमुक्तमध्या
शिथिलितसर्वाङ्गभूषणा गौरी ॥ ४४ इति ।)

महेन्द्रः — प्रियात्प्रियतरं नः । (इति दापितपारितोषिकं चरावनुजानाति, चरावुदीरितालोकशब्दं निष्क्रान्तौ ।)

महेन्द्रः — भगवन्, अपि न विज्ञातो वसन्तेनायमुदन्तः ?

वाचस्पतिः— महेन्द्र, दुरुपलम्भः प्रायेण महेश्वराणामन्तः पुरवृत्तान्तः । प्रथमं मातृकुलप्ररूढतया परिचारिकामुखादयमवगत-श्वराभ्याम् । नेह संशयितुं चावकाशः ।

[प्रविश्य]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

दौवारिकः — देव, धनाधीशसकाशादुपस्थितः प्रमोदवार्ताहरः पुरुषः ।

वाचस्पतिः— महेन्द्र, जाने जगदम्बिका पुत्रं प्रासूतेति ।

महेन्द्रः — [ससम्भ्रमम्] भद्र, किमिति प्रतिहारे प्रतिषिद्धः ?

दौवारिकः — [निष्क्रम्य पुरुषं प्रवेशयति]

पुरुषः — [सप्रणामम्] देवदेवस्य त्र्यम्बकसखस्य प्रियसन्देशोऽयम् ।
[इत्यर्धोक्ते]

महेन्द्रः — भद्र, निवेदय तावत् ।

पुरुषः —

आविर्भूतो गिरिशगृहिणीगर्भतो निर्भरौजाः
षोढा वक्त्रेऽप्यथ च दशधा दोष्णि रूढो द्विधा च ।
एकेनाह्ना दधदपि वयः षोडशाब्दं समिन्धे
दुर्वृत्तानां समिति दलने शक्तिमान् कार्तिकेयः ॥ ४५

अपि च —

पित्रोश्चुम्बति षण्मुखान्यपि मुखैःषड्भिर्मुदालिङ्गने
तेभ्योऽपि द्विगुणैर्भुजैर्व्यतिकरोत्येतावतः स्वान् भुजान् ।
एकाङ्कास्थिकयोभयोः सुखयति प्रेमात्तदेहैक्ययो-
श्चेतः, काचिदिहेदृशी विजयते बालस्य लीलाविभोः ॥

अभिषिक्तश्च तत्र भवांस्तदात्व एव सुरसैनापत्ये विष्वक्सेनापत्येन । तदद्यप्रभृति सपत्नेभ्यो नास्माकमातङ्कशङ्काऽप्यस्तीति ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

महेन्द्रः — (सानन्दम्) भगवन्, प्रवर्त्यतां मङ्गल्यातोद्यनिस्वनः ।
आरभ्यताञ्च लास्यमप्सरोभिः ।

वाचस्पतिः— (तथैवादिशति)

[सर्वे सभासदो महेन्द्राय रत्नान्युपाहरन्ति]

महेन्द्रः — (वितीर्णविभूषणाम्बरं पुरुषं विसर्जयति)

[निष्क्रान्तः पुरुषः]

[नेपथ्ये]

अब्रह्मण्यम् ! अब्रह्मण्यम् !

महेन्द्रः — भगवन्, ज्ञायतां किमेतदिति ।

[नेपथ्यार्धप्रविष्टः]

प्रतिहारी — देव, देवसेनाधिनाथप्रादुर्भावमहोत्सवव्यासक्तेषु तावदत्र सर्वेषु तत्र भवतो रागस्य कन्या रतिरधिसौधं पर्यङ्कप्रसुप्तैव केनापि मायाविनाऽपहृता न दृश्यत इति पर्याकुलस्य तत् गृहजनस्य समाक्रोशतो महानयं कोलाहलः ।

महेन्द्रः — [ससंरम्भम्] भगवन्, कथमिदमापतितमयशस्करमस्माकम्, को वाऽद्यामरावति साहसिकत्वं तदिदमाचचार । दित्सिता हि कल्याणी रतिः पितृभ्यां वत्साय । कृतसुरकार्ये च प्रत्यागते वत्से किं प्रतिपत्तव्यमस्माभिः । कथं वा ज्ञायेत कन्यापाटच्चरः सोऽपसदः ?

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

वाचस्पतिः— महेन्द्र, तर्कयामि रतिहेतोः कुमारं प्रति स्पर्धावतोलब्धान्तरस्याधुनाऽसुरस्य शम्बरस्य कर्मणाऽनेन भवितव्यमिति ।

महेन्द्रः — (सक्रोधम्) आः, कृतं मे मूर्ध्नि पदमसुराधमेन । (इत्युत्थायोद्धतं परिक्रामन्, प्रतिहारिणं प्रति) भद्र, समाज्ञापयाधिकृतान् सेनासन्नाहाय । भगवन्, समाश्वास्यतामाप्तपुरुषमुखेन सखा मे रागः । एष तावदिदानीम्—

क्षोणीभृत्कुलपक्षपालिलवनाकुण्ठाश्रिणा विस्रवद्-
वृत्रासृग्भरलब्धपारणसमारम्भेण दम्भोलिना ।
निर्मथ्याहमनेन दैत्यहतकं तं शम्बरं संयुगे
प्रत्याहृत्य रतिं वयस्यहृदयाह्लादाय जायेऽञ्जसा ॥ ४७

इति ।

वाचस्पतिः— महेन्द्र, कियदेतद् भवतोऽपि प्रतिज्ञातपूर्वो हि वधः, शम्बरस्य कुमारेण स्वयमेव । अतः स एवास्य यशसो भाजनं भवतु ।

महेन्द्रः — भगवन्, एवमप्यस्माभिः परिपन्थिनः पार्ष्णिग्राहिभिर्भवितव्यम् ।

(इति निष्क्रान्तास्सर्वे)

॥ तृतीयोऽङ्कः समाप्तः ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ चतुर्थोऽङ्कः ॥

[ततःप्रविशति रागो मुदिता सख्यौ पुरोहितश्च)

॥ अङ्कास्यम् ॥

राग: — (सवैक्लव्यम्) हा वत्से—

समुत्पन्ना मान्ये सकलभुवनानामभिजने
सुते लक्ष्मीजानेरुचितमनुरक्ताऽसि सुदृशे ।
गुणैः स्त्रैणं सर्वं ननु च हृतगर्वं कृतवती
कथं वत्से याताऽस्यसदृशमिमां हा परिणतिम् ॥ १

हन्त !

हविर्निर्वापार्हां स्रुचमधिमखं श्वेव हतकः–
स्रजं हृद्यां जात्यैर्मणिभिरतिलोलः कपिरिव ।
नृशंसः सारङ्गीं वृक इव भयोल्लोलनयनां
जहार त्वां वत्से स कथमसुराणामपसदः ॥ २

मुदिता — (साश्रुपातम्) हा जादे, कहिं तुह वअणदोसारअणं पेक्खिस्सं । (हा जाते क्व तव वदनचन्द्रं द्रक्ष्यामि ? सानुस्मरणम्)

किं दोहिणस्स अह वा पसवव्वहाय
आहो विवड्ढणकिदस्स पलिस्समस्स ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

णाणाविहस्स जाह वा? तुह कीलिअस्स
हा कस्स कस्स सुमिरामि? किसोरिव मे ।।

(किं दौहृदस्य अथवा प्रसवव्यथाया
आहो विवर्धनकृतस्य परिश्रमस्य ।
नानाविधस्य यथा वा तव क्रीडितस्य
हा कस्य कस्य स्मरामि किशोरिके मे ।।) ३

सख्यौ — (साक्रोशम्)

अहि रूढकुंजराणं
दठ्ठूण वहूवराण सोहग्गं ।
उक्कंठिआ सहीणो
पलि हासे लज्जिआ कहिं दाणिं ।।

(अधिरूढकुञ्जरयो-
र्दृष्ट्वा वधूवरयोः सौभाग्यम् ।
उत्कण्ठिता सखी नौ
परिहासे लज्जिता क्वेदानीम् ।।) ४

(इति पुरोहितवर्जं सर्वे मोहमुपगम्य पुनः संज्ञां लभन्ते)

रागः — (अनुस्मृत्य)

विहारे बालाभिः सह विततगेहोपकरणं
जमत्यां दाम्पत्योचितमभिदधाना बहुविधम् ।

CC-0T Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अकस्मात् प्राप्ते मय्यखिलमपि हित्वाऽनुजननि
ह्रिया लीना वत्सा मम कथमपैतु स्मृतिपथात् ॥ ५

मुदिता —
जादे सकोदुआए मए खु दावूण पुरिसणेवच्छं ।
एसा सुअवाणी दे भणिदे जाए त्ति संभमो आसी ॥

(जाते सकौतुकया मया दत्त्वा पुरुषनेपथ्यम् ।
एषा शुकवाणी ते भणिते जायेति सम्भ्रम आसीत् ॥) ६

सख्यौ —
पुढमं पासाअ गआ
पुररच्छाए विणिग्गअं मअणं ।
पेक्खिअ परूढलज्जा
आसी हा लज्जिदुं वि सही ॥

प्रथमं प्रासादगता
पुररथ्यया विनिर्गतं मदनम् ।
प्रेक्ष्य प्ररूढलज्जा-
ऽऽसीद् हा लज्जितुमपि सखी ॥) ७

(इति पुनस्सर्वे मोहमुपगच्छन्ति)

पुरोहितः — महाभागाः, कृतं विलापेन । आपतिते दुर्जाते धैर्यमवलम्ब्यताम् ।

(सर्वे समाश्वसन्ति)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

रागः – (सचिन्तम्) हन्त, तमसुराधममनुद्रुतस्य सख्युः ।

[प्रविश्य, आकाशयानेन]

चारणः – (मध्येसरणि सौधाग्राङ्गणगतं रागमवलोक्य, स्वगतम्) अनुल्लङ्घ्योऽयमत्रभवान् । (इत्युपसृत्य) आर्य, प्रणमामि ।

रागः – भद्र, शङ्के, सत्वरेण त्वया कुमारजयन्ताय महेन्द्र-वार्ताप्रापकेण भवितव्यम् ।

चारणः– आर्य, अथ किम् ?

रागः – भद्र, अप्यस्ति प्रमोदवृत्तान्तः ।

चारणः – आर्य, अस्माकमविदितापहृतां कल्याणीं रतिं स्वरथमारोप्य सत्वरमपक्रामन्तमसुरपाशं सन्नद्धया सह सुपर्वपृतनयाऽनुद्रवति द्रुतमन्तकवरुणवित्तेशवसुरुद्रादित्यमरुत्परिवृते देवे मरुत्वति शम्बरसम्बन्धिनः शूरपद्मसिंहास्यतारकप्रभृतयो दनुजपतयो महता बलेन मध्येमार्गमवाग्रहीषत ।

(सर्वे विषादं नाटयन्ति)

रागः — ततः ।

चारणः — ततश्च यावच्चिरप्ररूढवैरायितसमिध्यमानक्रोधानले सुरासुर-ध्वजिन्यावन्योन्यं समापततः ।

अत्रान्तरे च भगवानधिरूढबर्ही
षड्भिर्भुजैर्द्विगुणितैर्विधृतोग्रहेतिः ।

CC-0 Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सेनाधिभूःसरभसं सहपारिषद्यः
शत्रुं द्विषद्भिरवरुद्धमभिप्रपेदे ॥ ८

रागः — (साश्वासम्) समये प्राप्तो हि शक्तिपाणिः । ततस्ततः ?

चारणः — अथ पुनरहम्प्रथमिकाभिपतदमरासुरवीरचक्षुः प्रसरनिरोधित्वङ्गदुत्तुङ्गतुरङ्गखुरपुटाभिहतधरातटसमुद्धूत - धूलिपटलप्रशमनपटुकुम्भिविगलन्मदाम्बुजम्बालितसङ्गराङ्गणनिमग्नरथाङ्गतानिष्पन्दस्यन्दने परस्पराभिघातखणखणायमानप्रहरणोड्डामरप्रहारे प्रवृत्ते सम्प्रहारे —

शक्त्या विशाखस्य विभिन्नवक्षाः स सूरपद्मोऽन्तकसद्म भेजे ।
अवाङ्मुखःसिंहमुखःपपात पर्यस्ततारोऽजनि तारकश्च ॥ ९

(सर्वे हर्षं नाटयन्ति)

रागः — समुन्मूलितं हि लोकत्रयशल्यं महासेनेन ।

चारणः — अनुजानातु मामार्यः कुमारजयन्तस्यान्तिकगमनाय ।

रागः — भद्र, अथ कन्याचोरस्य को वृत्तान्तः ?

चारणः — आर्य, एवमेतस्मिन् वर्तमाने समरसमारम्भे बाणपातान्तरमात्र एव दृश्यमानः प्रजवेन रथेन दूरमतिपतन्न दृश्यते स क्व गतो वा ?

(इति कथयन्नेव निष्क्रान्तः)

(सर्वे पुनर्मोहेन भूम्यां निष्पतन्ति)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पुरोहितः – (सखेदसम्भ्रमं भृङ्गारोदकेन सर्वान् सिक्त्वा) महाभागाः, अक्रमतिमात्रेण व्यामोहेन । समाश्वसित समाश्वसित ।

(सर्वे समाश्वसन्ति)

रागः – हा वत्से, शकुन्तिकेव सौनिकस्य शरारोरसुरस्य हस्तगता कथं प्राणिषि ?

मुदिता - जादे, एरिसं दुज्जादं अणुहोदुं चेअ दुब्भगाए गब्भे समुप्पण्णासि ? (जाते, ईदृशं दुर्जातमनुभवितुमेव मम दुर्भगाया गर्भे समुत्पन्नाऽसि ?)

सख्यौ – पिअसहि, एव्वं हांदव्वे कुदो तुए अम्हाणं सोहिदं संवुत्तं ? (प्रियसखि, एवं भवितव्ये कुतस्त्वयाऽऽवयोः सौहृदं संवृत्तम् ?)

पुरोहितः – महाभागाः, प्रतिहते बलवति प्रतिबन्धे तत्रभवता शक्तिधरेण क्व गतो मोक्ष्यते स तावदसुरापसदो वज्रधरस्य । न हि जातु परदेवताप्रसादोऽन्यथाभावी ।

[प्रविश्य]

मयूरिका – (सहर्षसम्भ्रमम्) ताद अज्जू, पिअ वो णिवेदेमि । (तात अम्ब, प्रियं वो निवेदयामि ।)

रागः – (सौत्सुक्यम्) कथय भद्रे, किं प्रत्याहृता वत्सा महेन्द्रेण?

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मयूरिका - ताद, भअवदीएत्ति भणिदव्वं। (तात, भगवत्येति भणितव्यम् ।)

रागः - कथमिवैतत् ?

मयूरिका - ताद, जाव भट्टिदारिअं ओहरिदं णिवेइदुं तादेण आणत्ता भअवदीए सविहं गअम्हि दाव तहिं दिट्ठा मए भट्टिदारिआ। (तात, यावद् भर्तृदारिकामपहृतां निवेदयितुं तातेनाज्ञप्ता भगवत्याः सविधं गताऽस्मि तावत् तत्र दृष्टा मया भर्तृदारिका ।)

मुदिता सख्यौ च – एवं वि णाम सुप्पहादं होएज्जइ। (एवमपि नाम सुप्रभातं भवेत् ।)

रागः — हला, नूनं भ्रान्तिरीदृशी भवत्याः ।

मयूरिका — किं अज्जाणं मिच्छावअणम्हि। भअवदीए णिअजोअमाहप्पेण णिम्मिअं मायावइं णाम भट्टिदारिआरूवसरिस इत्थिअं संवरस्स रहे तस्स सवि अविण्णादं विणिवेशिअ भट्टिदारिआ मोइदेत्तितत्तहोदीए वसिणीए क्खु णिवेइदं। (किमार्याणां मिथ्यावचनाऽस्मि ? भगवत्या निजयोगमाहात्म्येन निर्मितां मायावतीं नाम भर्तृदारिकारूपसदृशीं स्त्रियं शम्बरस्य रथे केनाप्यविज्ञातं विनिवेश्य भर्तृदारिका मोचितेति तत्रभवत्या वशिन्या खलु निवेदितम् ।)

[सर्वे सम्मोदपरवशा वितिष्ठन्ते]

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

रागः — (पुरोहितं प्रति) भगवन्, किमेतन्नप्रत्येमि ?

पुरोहितः – महाभाग, क इह विस्मयः ? महाप्रभावा हि भगवती। अथ च —

निर्मातुं सिन्धुमन्धुं तमपि तमचलं लोष्टमेतत्तथैव
द्यां क्ष्मां तां तां सुदूरं सविधगतमदस्तादृगित्थञ्च नेत्थम् ।
एकं नानेदमेवं पुनरभिलषितं वस्तु हस्ते विधातुं
दुष्प्रापं वा क्षमायाः किमिव हि भुवने योगसिद्धेरसाध्यम् ॥

मुदिता – [सोल्लासम्] पअडिदं खु अवच्चवच्छल्लं पिअसहीए सव्वत्थसाहिआए। (प्रकटितं खल्वपत्यवात्सल्यं प्रियसख्या सर्वार्थसाधिकया ।)

मयूरिका – ताद, ममाहि आअण्णिदज्जूतादपरिकिलेस वुत्तंताए सत्तरं भट्टिदारिअं घेत्तूण एत्थ आअच्छंतीए भअवदीये पुरदो पहिदा अहं केलासादो पुढमाअदस्स तत्तहोदो वसंतस्स घरदुवारदेसदिट्ठादो कुमालवम्महसविहं पडिगच्छंतादो पणिहिणो कोइलआदो आअण्णिदवदी । जह, महाभाओ कुमाल वम्महो वि दिण्णाणुण्णो भअवंतेहि पव्वदीपरमेसरेहिं आअच्छइत्ति । (तात, मत्सकाशादाकर्णिताम्बातातपरिक्लेशवृत्तान्तया सत्वरं भर्तृदारिकां गृहीत्वाऽत्र समागच्छन्त्या भगवत्याः पुरतः प्रहिताऽहं कैलाशात् प्रथमागतस्य तत्र भवतो वसन्तस्य द्वारदेशदृष्टात् कुमारमन्मथ-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सविधं प्रतिगच्छन्नः प्रणिधेः कोकिलकादाकर्णितवती । यथा, महाभागः कुमारमन्मथोऽपि दत्तानुज्ञो भगवद्भ्यां पार्वतीपरमेश्वराभ्यामागच्छतीति ।

रागः — इदमपि प्रियं नः । हला, किं न कथितं त्वया कोकिलकाय वत्सायाः प्रत्याहरणवृत्तम् ?

मयूरिका – ताद, आदिट्ठम्हि खु तत्तहोदीए वसिणीए, जह णप्प-आसणिज्जो अण्णस्स कस्स वि एसो अत्थो । (तात, आदिष्टाऽस्मि खलु तत्रभवत्या वशिन्या यथा न प्रकाशनीयोऽन्यस्य कस्याप्येषोऽर्थः ।)

रागः – (ससम्भ्रमम्) तदेत प्रत्युद्यामो भगवतीम् ।

[इति सहेतरैर्निष्क्रान्तः]

[ततः प्रविशति रथेन सारथिर्द्वितीयो मन्मथः]

मन्मथः – (रतिमनुस्मृत्य सपरितापमात्मगतम्)

कार्यान्तरव्यग्रतया कियन्तं कालं ममासीत् पुटपाककल्पः ।
कान्तावियोगस्तनुतेऽधुना तु कामप्यसौ दुर्विषहामवस्थाम् ॥

तर्कयामि तावदहमिव प्रियतमाऽपि भूयसा वियोगदवदवथुना दूयत इति । पुरा खलु तातानुज्ञया सुरकार्याय सत्वरममरावत्या निष्क्रामति मयि —

CC-0 T Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

विस्रस्ताखिलगात्रमाकुलवलन्नेत्रं प्रभूतोदयद्-
भूयः संयत बाष्पनिर्भरगलन्निश्वासदुनाधरम् ।
उद्ग्रीवं प्रपदस्थया सहचरीदत्तावलम्बं तया
सौधाग्रेऽस्मदनुप्रयातमनसा तन्व्यैव तस्थे चिरम् ॥ १२

(सानुस्मरणम्) हन्त, इदमेव समुत्कीर्णमिव मे मनसो न व्यपैति । यत्किल जनन्या गौरवान्नन्दनवनात्प्रति-निवर्तमाना —

गत्वा कियन्त्यपि पदानि निवृत्तकण्ठ-
मास्राविलेक्षणमवेक्ष्य सरोरुहाक्षी ।
साकूतमाह सहकारतरो कदा नु
नेत्रोत्सवाय भविताऽसि पुनर्ममेति ॥ १३

सा तावदिदानीम् —

धत्ते किन्नु धृतिं किमाचरति वा तन्वी कथं वर्तते
यद्वा जीवति वा न वा चिरतरं मद्विप्रयोगाकुला ।
स्मृत्वा हन्त मम प्रयाणसमये तस्या दशां तादृशीं
यत्सत्यं व्यथितं मनः प्रतिकलं किं किं न वा शङ्कते ॥

(अशकुनं सूचयित्वा सखेदम्)

स्फुरति नयनं वामं कामं भुजश्च मुहुर्मुहु-
र्वपुरधिगतस्वेदं चेदं स्वरोऽप्यवसीदति ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अहह बलवत्कम्पं सम्प्रत्यनिष्टविशङ्कि मे
हृदयमधुना स्मारं स्मारं प्रियां परितप्यते ॥ १५

(पुरोऽवलोक्य) सचकितमापतन्नयं प्रणिधिः कोकिलक इव लक्ष्यते ।

[प्रविश्य]

कोकिलकः— जेदु जेदु देओ । (जयतु जयतु देवः ।)

मन्मथः — कोकिलक, अचिरप्रत्यागतमस्वस्थहृदयञ्च त्वां लक्षये । किं निवेदितास्मदागमनो मन्त्री वसन्तः ? तद् - द्वारा च तातो ज्यायान् ।

कोकिलकः — (सभयम्) देव्व, असंणिहिदो खु अमरावदीए अमच्चो । (देव, असन्निहितः खल्वमरावत्याममात्यः ।)

मन्मथः — (सविचिकित्सम्) किं कारणमसन्निधाने तस्य ?

कोकिलकः — (सगद्गदम्) देव्व, संबरासुरं अणुद्दवंतेण देव्वेण जंभरिउणा समं ससेण्णो सो गओ । (देव, शम्बरासुरमनुद्रवता देवेन जम्भरिपुणा समं ससैन्यः स गतः ।)

मन्मथः — (सरोषम्) रे विस्पष्टं कथय ।

कोकिलकः — (सोत्कम्पम्, अभयं याचते)

मन्मथः — दत्ताभयोऽसि, यथावृत्तमावेदय ।

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कोकिलकः - देव्क, ओहरीआ खु तत्तहोइ रई पुरिल्लदव्वावसदेण ।
(देव, अपहृता खलु तत्र भवती रतिः, तेन पूर्वदेवापसदेन ।)

मन्मथः — (सास्रम्) हा प्रिये. कथं भवितासि ।

(इति रथोपस्थे मूर्च्छति)

सारथिः - आयुष्मान्, समाश्वसिहि,, समाश्वसिहि ।

मन्मथः - (समाश्वस्य सकरुणास्रम्)

सर्वस्वं मे हृदयहृदयं चक्षुषःकिञ्च चक्षुः-
प्राणप्राणःसुखसुखनिधिः प्रेमचप्रेमभूम्नः ।
व्याघ्रस्येव प्रकृतिकृपणा नैचकी देवशत्रो-
र्हस्ते लग्ना कथमिव बत प्राणिति प्रेयसी सा ॥ १६

सारथिः - आयुष्मन्, नैष विषादसमयस्तावदायतिक्षममनुचिन्त्यताम् ।

मन्मथः — सूत, किमाचरामि । सम्प्रति हि—

विवेकं न्यक्कुर्वन् - सहजमपि धैर्यं शिथिलयन्
खिलीकुर्वन् व्रीडां विनयमतिमात्रं व्यपनयन् ।
विमोहं व्यातन्वन्नहह परितापं वहलय-
न्नियत्तातिक्रान्तः प्रभवति विकारःकिमपि मे ॥ १७

सारथिः — आयुष्मन्, एवमेवैतत् । अथापि परिपन्थिनो विनिग्रहे
सोत्साहतैवायुष्मतोऽधुना सुश्लाघा ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मन्मथः — (सधैर्यम्) साधु रथकुटुम्बिन्, साधु ।

प्रियमाश्वासनार्हं एव बहवस्सन्ति शंसितुम् ।
हितस्य च यशस्यस्य वक्तारो विरलाः पुनः ॥ १८

कोकिल, विज्ञाप्यतां तातः । शापिताः स्थ मया । सर्वैर्भवद्भिरलङ्क्रियताममरावती । अहमेव तस्यासुर-तस्करस्य दर्पं व्यपनेष्यामीति ।

कोकिलकः – जं आदिसइ देव्वो । (यदादिशति देवः ।)

(इति निष्क्रान्तः)

मन्मथः – सूत, वैजयन्तपुरगामिनाऽध्वना नोदयस्यन्दनाश्वान् ।

सारथिः – (तथा कुर्वन् सर्वतोऽवलोक्य) आयुष्मन्, पश्य पश्य समुत्थितानुत्पातानेतान् ।

दिशः कलुषिता भृशं न च विभाति भासांनिधि-
र्युगान्त इव वान्ति सन्ततममी हि झंझानिलाः ।

मन्मथः – (सोल्लासम्)

इयं ध्वनति शिञ्जिनी मम धनोरनास्फालिता
विनिस्सरति सत्वरं शरततिश्च तूणीमुखात् ॥ १९

सारथिः – (मन्मथस्य हर्षमभिवर्धयन्) आयुष्मन् —

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यथैतैरुत्पातैरजानि परितो दारुणतरै-
र्यथा चात्रिर्भूतं हृदयसुखदैस्तैः सुशकुनैः ।
तथा शङ्के भावी सपदि समरः कोऽपि च महान्
जयः किञ्चास्माकं सकलजगदानन्दजननः ॥ २०

(दक्षिणस्यां दिशि चक्षुर्व्यापारयन्)

मन्थाद्रिक्षोभ्यमाणोऽर्णव इव निनदन् दुन्दुभिःश्रूयते यत्-
कल्पाभ्रोन्मेषकल्पो दिवि यदयमितो रेणुरुच्चैर्जिहीते ।
कम्पन्ते यच्च शम्पा इव दिशि दिशि सस्वर्णरेखाःपताकाः
शङ्के नेदीयसी तत् प्रतिभटपृतना वर्तते वर्त्मनीति ॥ २१

मन्मथः — (सावष्टम्भम्) दिष्ट्या सन्निहित एव मे धनुर्व्यापारस्यावसरः ।

सारथिः — (सचिन्तम्) आयुष्मन्, शरासनमात्रमित्रस्य तव महत्या सेनया परिवृतमसुरं प्रत्यभियोगः शङ्कामङ्कुरयति मे ।

मन्मथः — (सहेलम्) सूत, किमदृष्टास्मद्भुजशौण्डीर्य इव विचिकित्ससि ?

तां लङ्कां विशातः पुरा हनुमतः को वा द्वितीयोऽभवत्
तार्क्ष्यस्यापि सुधाहृतौ सुरचमूमाधावतोऽनुद्रुताम् ।
पार्थस्याथ च गोग्रहे दलयतः खैरं कुरून् सङ्गता-
नेवं सम्प्रति विघ्नतो रिपुबलं का मे सहायस्पृहा ॥ २२

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सारथिः — (अग्रतो निरूप्य) आयुष्मन्, जाने भवद्रथालङ्कारस्य ध्वजमकरस्य दर्शनेन परिज्ञातभवदभियोगश्चमूमन्तराले विधाय रिपुरेक एव रथेन दूरमतिपततीति ।

मन्मथः — (सरभसम्) सूत, यद्येवं वामेन परिहरन् परबलमनुराध-मरथाभिमुखमवस्थापय रथं मे ।

सारथिः – कशाहतित्वरितपातिभिस्तुरगैर्यथानियोगमाचरति)

[ततः प्रविशति रथस्थः शम्बरः]

शम्बरः — (मन्मथमवलोक्य सावज्ञम् — स्वगतम्) एष खलु पञ्चेषुर्ममापि हस्तगतां योषित प्रतिनिनीषुः कुलिङ्ग-विहङ्गभङ्गीमनुसरति ।

मन्मथः — (शम्बररथस्थिता मायावतीमवेक्ष्य सविषादम्, आत्मगतम्)

मरुप्रान्ते हन्त स्थलकमलिनीग्रोद्गतव्रती
तरक्षोःपार्श्वस्था चकितचकिताक्षीव हरिणी ।
तमोलीढा चान्द्री तनुरिव कलाशेषविभवा
न राजत्येषा मे दितिजपरिभूता प्रियतमा ॥ २३

अपि च —

पश्यन्ति न हि पश्यतीन्दुवदना यन्मां रथस्थं पुरः
सोल्लासं न च मे श्रृणोति धनुषो यज्ज्यारवाडम्बरम् ।

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यात्त्रासेन च धावतो रिपुभटान् विज्ञाय नो मोदते
जाने प्रोषितचेतनेव तदसावन्यादृशी वर्तते ॥ २४

(सनीडगतं शम्बरं प्रति सरोषम्, प्रकाशम्)

रे रे कन्यामलिम्लुच —

समादत्से दंष्ट्रामिह विषधरस्यापि सरुषः
सटां दर्पादुत्पाटयसि सहसा कुञ्जररिपोः ।
असेर्धारां घोरामपि रसनया लेक्षि नितरा-
मिमां यत्तन्वङ्गीमपहरसि नाशाय कुमते ॥ २५

शम्बरः — (सोत्प्राशम्) रे कुसुमेषो, सर्वस्य साधारण्याः कन्यायाः कृते मामपि शम्बरं प्रत्युद्यतो विस्पष्टं हि ते सुमतित्वम् । स्त्रीपुंसरहः सङ्गराङ्गणोपयुक्तशौर्यस्य तवापसरणमेव शरणमतः समरमुखात् । यदि वा युद्धश्रद्धा, तदेहि समीकक्षमां क्षमामासादयावः ।

मन्मथः — (सरोषस्मितम्) दुर्मुख, कृतं विकत्थनेन । वाग्विदग्धं त्वां शरैरेव प्रत्युत्तरयामि, पूरयामि च कलहप्रियस्य मुनेराहवदर्शनकुतूहलम् ।

[इति निष्क्रान्तौ मन्मथः शम्बरश्च]

(ततः प्रविशत्याकाशयानेन नारदः शिष्यश्च)

नारदः — (सानन्दताण्डवम्, महतीमास्फालयन्)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

रमे जगति पर्यटन्नविरतं द्वयेनामुना
सुरासुरधनुभृतां समरसाहसैरद्भुतैः ।
रमेशपरमेशयोरथ च पावनैःकीर्तना-
दपास्तभवबन्धनैः कुशलधामभिर्नामभिः ॥ २६

शिष्यः — (सविस्मयम्) भअवं, भअवंतेण काइ काइ समरब्भुदाइं दंसणपहं णीदाइं ? (भगवन्, भगवता कानि कानि समराद्भुतानि दर्शनपथं नीतानि ?)

नारदः — (सशिरःकम्पम्) साधु पृष्टं वत्सेन ।

दृष्टो दैत्यपतिं नखैर्दलयतो मायाहरेर्विक्रमः
सन्नाहोऽथ पुरत्रयं प्रदहतस्तत्तादृशो धूर्जटेः ।
संरम्भोऽपि महान् बलस्य निधने जातक्रुधो वज्रिण-
स्तारायाश्च कृते तथा प्रतिभयो देवासुराणां रणः ॥

अन्येषामप्यसंख्यातानि लोकप्रवीराणां रणापदानानि ।

शिष्यः — अह भअवं, अलद्धाहवदंसणसुहेसु सूरद्धएसु कहं अत्तहोदा अप्पा विणोदीअदि ? (अथ भगवन्, अलब्धाहवदर्शन-सुखेषु दिवसेषु कथमत्रभवताऽऽत्मा विनोद्यते ?)

नारदः — वत्स, समतिर्भवान् ।

दम्पत्योरनुरक्तयोरपि मिषात् सम्पादितं वाक्कलिं
प्रकान्तं सहसा नियुद्धमथवा भयोत्सुकैर्बालकैः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

उक्ष्णो वाऽथ चतुष्पथेऽभिपततो योद्धुं मदेनोद्धुरान्
पश्यन् निर्वृतमानसोऽनवरतं हिण्डे महीमण्डले ॥ २८

शिष्यः — (विहस्य, स्वगतम्) दुप्परिहरा खु सव्वस्स वि अप्पणो पकिदी । (दुष्परिहरा खलु सर्वस्यात्मनः प्रकृतिः ।)

नारदः — इदानीं पुनर्भुवनैकशूरान् शूरपद्मार्दीन् शरव्ययता शरजन्मना दत्तनेत्रपारणस्य समहासैन्यडम्बरं शम्बरमभियुञ्जानेन कञ्जाक्षनन्दनेन पूरयिष्यते मे मनोरथः ।

शिष्यः— भअवं, अहिमदसक्करब्भवहारस्स तह च्चेअ देव्वं संपादेइ । एस उण मं संसओ वाहेइ संवरीसहस्स-दुज्जओ वि संवरो कहं वम्महेण जेदव्वो त्ति । (भगवन्, अभिमतशर्कराभ्यवहारस्य तथैव देवं सम्पादयति । एष पुनर्मां संशयो बाधते शाम्बरीसहस्रदुर्जयोऽपि शम्बरः कथं मन्मथेन जेतव्य इति ।

नारदः — किमाह भवान्, 'कथं शम्बरो जेतव्य' इति ?

पशुतिर्यङ्नरसुरासुरव्यामोहकारिणि ।
मारे संख्यातमायस्य मायाः किं प्रभवन्ति ताः ॥ २९

(अग्रतो भुवमवलोक्य, सहर्षसम्भ्रमम्) अहो, शम्बरमार्गविग्राहिणं मन्मथरथमभितः परिक्षिपतोऽसुरबलस्याडम्बरः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

श्च्योतद्दानाम्बुजम्बालितधरणितलं बृंहितप्रौढिफक्क-
ढ्क्कं प्रोच्चण्डशुण्डाविधुतिसरभसामोटितव्योमयानम् ।
तिर्यग्दन्ताभिघातप्रकटितबहलश्वभ्रमभ्रेष्वदभ्रं
वप्रक्रीडां भजन्तोऽनुकृतशिखरिणो दन्तिनःप्रोन्नदन्ति ॥

शिष्यः — भअवं, इदो वि दाव । (भगवन्, इतोऽपि तावत् ।)
(संस्कृतमाश्रित्य)

रिङ्खन्तः संख्यसीम्नि प्रखरखुरपुटोद्दामकुद्दालधारा-
धारालोद्दारितक्ष्मातलचलितरजोरुद्धरोदोऽन्तरालाः ।
हेषाघोषान् विशेषादहह विदधतः सादिभिश्चाधिरूढै-
र्वन्तः कुर्वतेऽमी कुतुकमतितरां पश्यतां पश्य तावत् ॥ ३१

नारदः — एतांश्च,

रथ्यैः पथ्यनुकूलचङ्क्रमपरैः सारथ्यमातन्वतः
स्वच्छायातुरगातिपातरभसप्रोत्साहिभिः शोभितान् ।
उत्खातस्खलनोच्चलद्ध्वजलतासंरुद्धपूषाध्वनः
संक्रीडच्चरणान्निशामय दृशामानन्दनान् स्यन्दनान् ॥ ३२

शिष्यः — भअवं, एत्थ अ एदेहिं । (भगवन् अत्र चैतैः ।)
(संस्कृतमाश्रित्य)

पादान्यासनमन्महीकमलधुक्क्ष्वेलादलद्दिक्तटं
प्रोन्मीलच्छतचन्द्रनिह्नुतमहाशस्त्रान्धकारोदयम् ।
व्यावल्गत्तरवारितपरं प्रक्रान्तचक्रभ्रमि
क्रीडद्भिः क्रियते स संयति दृगानन्दो भटैरुद्भटैः ॥ ३३

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

(सभयोत्कम्पम्) हद्धि हद्धि, जलनिहिपूरगब्भपविट्ठस्स संअत्तिअस्स विअ पडिरोहिवाहिजीमज्झगअस्स मअरद्धअस्स कहं णाम णिक्कमणं होएज्जइत्ति पज्जाउलम्हि । (हा धिक्! हा धिक्! जलनिधिपूरगर्भप्रविष्टस्य सांयात्रिकस्येव प्रतिरोधिवाहिनीमध्यगतस्य मकरध्वजस्य कथं नाम निष्क्रमणं भविष्यतीति पर्याकुलोऽस्मि ।)

नारदः — वत्स, विस्रब्धो भव । यत्किञ्चिदेतज्जगदहंवीरस्य मारस्य । अयं हि -

चक्रैश्छिन्दन् भटानां करचरणशिरस्त्रासयन् प्रासघातै-
रश्वान् शश्वद्गदाभिर्मदकलकरिणः प्रोथयन् क्रोधदीप्तः ।
सप्रासङ्गान् शताङ्गान् सपदि शकलयन् मार्गणैर्मार्गहेतोः-
पूषा पाथोदवृन्दादिव दितिजबलान्निःसृतःशम्बरारिः ॥ ३४

क्षणेन चेदानीम्,

शस्त्रोत्कृत्तगजाश्वदैत्यपिशितस्नाय्वस्थिमेदो वसा-
मज्जान्त्रोच्चयविस्रगन्धिरुधिरस्रोतस्विनी दुस्तरम् ।
तृप्यद्गृध्रश्रृगालकङ्ककरटं नृत्यकबन्धोल्बणं
दृप्यत्प्रेतपिशाचडाकिनिगणं जातं रणप्राङ्गणम् ॥ ३५

शिष्यः — भअवं, अदोवरं दुक्करं तक्केमि । जं अत्थंगओ थेरोसवंधू । ण विण्णाअदि अप्पकेरओ परकेरओ वा गाढंधआरेहिं । एक्कल्ला खु रअणीए पुरिल्लदेव्वा होंति । (भगवन्, अतः

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

परं दुष्करं तर्कयामि । यदस्तङ्गतः कमलबन्धुः । न विज्ञायत आत्मीयः परकीयो वा गाढान्धकारैः । बलवन्तः खलु रजन्यां पूर्वदेवा भवन्ति ।)

नारदः – कातर, मा विषीद । मन्ये मन्मथशस्त्रनिपातितभूयिष्ठ-चतुरङ्गसैन्येन शम्बरेण शम्बरीबलादाविष्कृतस्य तामसस्यास्त्रस्य प्रभाव एवायम् । यतः—

पुञ्जैरञ्जनकल्पितैरिव पुनःकालाग्निरुद्राननो-
न्निद्रैर्धूमभरैरिव प्रचलितैर्नीलाश्मशैलैरिव ।
पातालादिव निर्गतैः सुररिपुव्रातैःसमन्तादिदं
मुष्णद्भिः प्रसरं दृशोर्निचुलितं गाढान्धकारैर्जगत् ॥ ३६

शिष्यः – (साश्चर्यम्) भअवं कप्पंते वि किल दोहिं अब्भहिआ दह एव्वं दिणअरा समाणुम्मेसा सुणी अंदि । किं एदं अअंडे मत्तंडमंडलसहस्ससमुग्गमो । (भगवन्, कल्पान्तेऽपि किल द्वाभ्यामभ्यधिकादशैव दिनकरा समानोन्मेषाः श्रूयन्ते । किमेतत्, अकाण्डे मार्तण्डमण्डलसहस्रसमुद्गमः ।)

नारदः – वत्स, तामसास्त्रगर्वनिर्वापणनिरर्गलं प्रयोजितं प्रसवायुधेन प्राभाकरमस्त्रम् । ततश्च —

चूषन्तःसलिलं सरित्पतिसरित्कासारवापीगतं
गूढानां दिननायकाश्ममहसां दत्तावलम्बाः करैः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

छन्नस्तछन्नान्तभराः क्षणेन भुवनक्षेमङ्करप्रक्रियाः
पश्योद्यन्ति समन्ततः सरसिजश्रेयस्करा भास्करः ॥ ३७

शिष्यः — (सोद्वेगम्) भअवं, णूणं उक्कंतो लोअंतो पआवइणा, जं किल । (भगवन्, नूनमुत्क्रान्तः प्रजापतिना लोकान्तः । यतः किल ।) (संस्कृतमाश्रित्य)

कुर्वन्तो जगदेतदम्बरमयममी धारानुधाराशतै-
र्न्यग्भूतोन्मदकुम्भिबृंहितभरं गर्जाभिरूर्जस्वलाः ।
उत्केकारवमीक्षिताः शिखिकुलैरुद्योतिता विद्युता-
मुद्योतैः करकानिपातपरुषा वर्षन्ति वर्षाम्बुदाः ॥ ३८

नारदः — वत्स, विसर्जितं हि दुर्जनेन पार्जन्यमस्त्रमिदम् । कृतहस्तेन चास्त्रेषु कन्दर्पेण तदीयदर्पसमुत्सारणचणं प्रयुक्तमेव वायव्यमस्त्रम् । अमी हि –

वृक्षान्-भङ्क्षु क्षिपन्तो दिशि दिशि रभसादर्णवानाघूर्णयन्तः-
प्रासादान् सादयन्तः शिखरिकुलमिहामन्दमान्दोलयन्तः ।
धूलीभिर्दूषयन्तः सकलमपि जगत्तूलिविद्रावमेता-
नब्दान् विद्रावयन्तो युगविगम इवोद्यान्ति झंझासमीराः ॥

शिष्यः – (सोत्कम्पम्) भअवं किदं विसारविलोअणकोदुएण । एदे खु समुब्भिण्णपक्खणीसंगा डोंगरा रिंगंता परिदो वि थगअंदि । अम्हाणं खु अगदो वि णिग्गमणस्स वि अवआमो ण होज्जा । ता इदो दूलं ओसलम्ह ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

(भगवन्, कृतं सैन्यविलोकनकौतुकेन । एते खलु समुद्भिन्नपक्षनिः सङ्गाः पर्वता रिङ्गन्तः परितोऽपि स्थगयन्ति । आवयोः खल्वग्रतोऽपि निर्गमनस्यावकाशो न भवेत् । तदितो दूरमपसरावः ।)

नारदः — अहो दुष्टता दैत्याधमस्य, यत्पार्वतमस्त्रमाविष्कृतम् ।

पादाक्रान्तदिगन्तरैः सुरपथप्रोल्लङ्घिशृङ्गच्छटा-
निर्यन्निर्झरिणीनिपातरभसोत्खातप्रपाताश्मभिः ।
पातालप्रतिमल्लगह्वरदरीनिष्पीतवातैश्चितं
लोकं लोकय सर्वतःप्रचलितैः खर्वेतरैःपर्वतैः ॥ ४०

शिष्यः — [ससाध्वसम्] भअवं, किं एण्हि कादव्वं? एदे खु वेअंडमेत्ता गंडसेला णिवडंति । अहं एक्को एव्व पुत्तओ पिदुणो । (भगवन्, किमिदानीं कर्तव्यम्? एते खलु वेतण्डशैला निपतन्ति । अहमेक एव पुत्रकः पित्रोः ।)

नारदः — [विहस्य] वत्स, कृतं विचारेण । चिन्तित एवैतत्प्रतीकारोपायो वज्रहस्तानुजनन्दनेन । तथा हि —

हेलाविक्षतपक्षतिक्षरदसृग्धाराप्रकारोल्वणं
दीर्यच्छृङ्गसहस्रकीर्दुपलं प्रच्छिन्नभिन्नाद्रयः ।
निर्घातैर्बधिरीकृतश्रुतिपुटाल्लोकस्य शोकच्छिदः
स्वर्धाम्नां विततस्फुलिङ्गमभितो जृम्भन्ति दम्भोलयः ॥ ४१

CC-0T Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

शिष्यः — भअवं, कहं इ उवसभिदामअप्पकोवस्स भूदावेसो खु इमो । जं किल —

फुक्कारप्पसरंतदूमहविसज्जालवलीढज्जिदा
सेसक्खोणिरूहा खणेण परिदो दीसं दे दव्वीआर ।

भगवन् कथञ्चिदुपशमितामयप्रकोपस्य भूतावेशः खल्वयम् । यत्किल —

फूत्कारप्रसरद्दुःसहविषज्वालावलीदग्धा
शेषक्षोणिरुहाः क्षणेन परितो दृश्यन्ते दर्वीकराः।

नारदः — वत्स, मा बिभीहि ।

भोगत्रोटनचुञ्चुचञ्चुशिखरैर्निष्ठ्यूतचञ्चत्फणा
रत्नैर्यत्नलवं विनाऽपि त इमे तार्क्ष्यैःक्षयं निन्यिरे ॥ ४२

शिष्यः — भअवं, जाणामि देच्चेण पयोजिदं पण्णअत्थं पसमिदं पण्णअरिबुद्धअणंदणविसज्जिदेण गालुडत्थेण । (भगवन्, जानामि, दैत्येन प्रयोजितं पन्नगास्त्रं प्रशमितं पन्नगरिपुध्वजनन्दन विसर्जितेन गारुडास्त्रेण ।)

नारदः — वत्स, एवं व्युत्पद्यस्व ।

शिष्यः — भअवं तक्केमि पडिहदेसु समत्थेसु वि णिअत्थेसु संबरो माअयुज्झं उवक्कमिस्सइत्ति । (भगवन्, तर्कयामि प्रतिहतेष्वेवं समस्तेषु निजास्त्रेषु शम्बरो मायायुद्धमुपक्रमिष्यतीति ।)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

नारदः — प्रतिविधास्यति चात्र द्वेधाऽपि समाश्रितमहामायो मन्मथः ।

शिष्यः — भअवं, पेच्छ पेच्छ । उक्खादासिलदो खु एस पुरिसो भीसेइ मं भीसणो । (भगवन्, पश्य पश्य, उत्खातासिलतः खल्वेष पुरुषो भीषयति मां भीषणः ।)

नारदः —

नैतत् किञ्चन हन्ति निर्घृणतरो व्याघ्रस्तमुग्राकृतिः ।

शिष्यः — णं एदस्स वि दप्पखंडणपरो दीसेइ पंचाणणो । (नन्वेतस्यापि दर्पखण्डनपरो दृश्यते पञ्चाननः ।)

नारदः —

सक्रीडं शरभेण सोऽपि दमितः सर्वाण्डजक्ष्माभुजा ॥ ४३

अपि च —

युगपदुपात्तदैत्यकुलनाथविरोचनभू-
खलचुरिभूपपङ्क्तिमुखभौमशरीरममुम् ।
दमयति दुर्हृदं ननु गृहीतनृकेसर वद्-
वटुभृगुसूनुदाशरथिशौरिवपुर्मदनः ॥ ४४

शिष्यः — (साश्चर्यम्) भअवं, किं एदं एत्थ संगरंगणे ण संबरो वा से सिसारहल्लबोलो । संबररिऊ णवर पेक्खीअदि । (भगवन्, किमेतदत्र सङ्गराङ्गणे न शम्बरः न वाऽस्य सैन्यकोलाहलः । शम्बररिपुः केवलं प्रेक्ष्यते ।)

CC-0 Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

नारदः – वत्स, समभ्यस्ता तावदतः शम्बरान्माया तैरपि मयमारीच-मेघनादमुखैर्मायाविभिः ।

शिष्यः – भअवं, अदोवरं दुक्करं तक्केमि जं एक्केण वि संबरेण जणिदव्वामोहस्स वम्महस्स संबरसहस्ससमाअमे का णाम विअअपच्चासा । (भगवन्, अतः परं दुष्करं तर्कयामि, यदेकेनापि शम्बरेण जनितव्यामोहस्य मन्मथस्य शम्बर-सहस्र समागमे का नाम विजयप्रत्याशा ।)

नारदः – वत्स, किं न पश्यसि तावद्भिरेव मन्मथप्रतिरूपकैरवनितले शरविलूनविनिपातितानेतान् । एषोऽपि शम्बरः सर्वतः प्रतिहतशाम्बरीकं मन्मथेन शरनिर्मथिताश्वसारथिर्निश्वसन्निव पन्नगः खिन्नमानसः खड्गखेटकमात्रावशेषायुधोऽप्रतिपत्ति-मूढो वर्तते ।

शिष्यः – [सहर्षं शाटीमुद्धुन्वानः] साहु, वम्मह, साहु । णं वि संबरं ओहरिदगव्वं किदवंतो सि । (साधु, मन्मथ, साधु । एनमपि मन्मथमपहृतगर्वं कृतवानसि ।)

(नेपथ्ये)

[विजयकाहलो शङ्खनिस्वनोन्मिश्रो दिव्यनिस्साण ध्वनिः]

शिष्यः – (ससम्भ्रमम्) भअवं कुदो एसो वरिसासमअसमुम्मीलंत-जीमूदत्थणिअधीरो मंथाअलमहिज्जंतजलणिहिकल्लोल-हलब्बोलगहीरो भेरीझणी सूणीअदि ? (भगवन्, कुत

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

एष वर्षासमयसमुन्मीलज्जीमूतस्तनितधीरो मन्थाचलमथ्यमान-जलनिधिकल्लोलकोलाहलगम्भीरो भेरीध्वनिःश्रूयते ?)

नारदः — (सहर्षम्) वत्स, किं न पश्यसि? अयं हि—

सम्मोहनास्त्रमोहितमेतं करवालकृत्त मूर्द्धानम् ।
शम्बरमवपात्य रथात् स्वरथे प्रियया समं स्मरो जयति ॥

तदेष द्युसदां महोत्सवसमारम्भः ।

शिष्यः — (विलोक्य) भअवं, पअलिदो एव्व अमरवइं ससंभममिलिअसुरमहेसिकरपमुत्तेहिं पुप्पवरिसेहिं अवकिरिज्जंतो समरलद्धविअअलच्छीसुहओ तेल्लोक्कमल्लो पसूणाउहो । (भगवन्, प्रचलित एवामरावतीं ससम्भ्रममिलितसुरमहर्षिकरप्रमुक्तैःपुष्पवर्षैरवकीर्यमाणः समरलब्धविजयलक्ष्मीसुभगस्त्रैलोक्यमल्लः प्रसूनायुधः ।)

नारदः — वत्स, तदेहि मन्मथविजयवार्ताहराणां महेन्द्रचराणां प्रथमप्रस्थितावावामेतावन्तमनेहसमेकान्तिनो भक्तान् निजसन्दर्शनेनानन्दयितुं, श्वेतद्वीपसीम्नि सुचिरं विहृत्य साम्प्रतमेवानुप्राप्तं भगवन्तमुपेन्द्रं महेन्द्रं चानेनोदन्तोपहारेणानन्दयावः ।

(इति निष्क्रान्ताः सर्वे)

॥ चतुर्थोऽङ्कः समाप्तः ॥

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ पञ्चमोऽङ्कः ॥

(नेपथ्ये, सडिण्डिमारवमुच्चैः)

भो भोः, पौराः, निदेशोऽयं देवस्य देवाधिराजस्य ।

यथा —

उच्छ्रीयन्तां पताकाः प्रतिभवनमधिद्वारदेशं कदल्यो
बध्यन्तां कीर्णगन्धद्रवकुसुमभरं तोरणाङ्काः क्रियन्ताम् ।
रथ्याः सर्वाः समन्तादभिहतविविधातोद्यमह्नाय भेर्य-
स्ताडयन्तां यत्समायात्यधिगतविजयःसैष मारःकुमारः ॥ १

[चूलिका]

[ततः प्रविशति रथस्थः साध्वसनिमीलितदृशो मायावत्या हठालिङ्गनोत्पुलकाङ्गो मन्मथः]

मन्मथः — [सुखातिशयमभिनयन् स्वगतम्] अये महदुपकृतमिमामपहरताऽपि मे शम्बरेण । यतः —

वित्रस्तैणविलोलदृष्टिविगलद्बाष्पं सकाकुस्वरं
कण्ठासक्तभुजालतं परिगलत्संव्यानचेलाञ्चलम् ।
गाढारोपितनिर्भरोन्नतकुचं भूयो मिलत्सम्भ्रमं
श्लिष्यन्ती स्वयमेव मां गमयते सौख्यातिभूमिं प्रिया ॥

अतश्च —

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

रोमाञ्चितावयवमञ्चितघर्मवारि-
विध्वस्तधैर्यमितरस्वविवेकशून्यम् ।
आनन्दवारिधितरङ्गविगाह्यमानं
चेतो ममोल्लसति कोऽपि पुनःप्रकारः ॥ ३

[निरूप्य] हन्त, नाद्यापि समाश्वसिति भीरुरेषा —

त्रिस्तैरलकैर्मुखेन विरलच्छायेन धौताधरै-
रास्रैर्निश्वसितानिलैरनुकलप्रोक्षिप्तवक्षोरुहैः ।
गात्रेणातितरां प्रवातकदलीमित्रेण नेत्रश्रिया
त्रस्तैणार्भकलोलया च महते खेदाय सेयं मम ॥ ४

(प्रकाशम्) सुतनो, समाश्वसिहि, समाश्वसिहि । मम मन्मथस्यापि रथमधिरूढायाः कुतोऽधुनाऽपि तव त्रासाशङ्का ।

मायावती – (साश्वासमुन्मीलितलोचना मन्मथमवलोक्य, स्वगतम्) को णु एसो कारुणिओ इमादु दुज्जातादो मं उद्धरिअ एव्वं पेम्मणिब्भरं भणाइ (सविस्सयम्) कहं उण सुइप्परिइदे विअ एण्हिं चेअ दिट्ठे वि इमस्सिं मह ईरिसो राआणुवंधो । अहवा दिण्णं खु मे जीविदं णेण । (प्रकाशम्) महाभाअ, मह मंदभाअणीए किदे वि महाभाएण दुल्लहप्पहवो अप्पा एद्दहं महंते साहसम्मि णिओजिअ आआसिओ । (कोन्वेष कारुणिकोऽस्माद्

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

दुर्जातान्मामुद्धृत्यैवं प्रेमनिर्भरं भणति । कथं पुनः सुचिरपरिचित इवेदानीमेव दृष्टेऽप्यस्मिन् ममेदृशो रागानुबन्धः । अथ वा दत्तं खलु मे जीवितमनेन । (प्रकाशम्) महाभाग, मम मन्दभागिन्याः कृतेऽपि महाभागेन दुर्लभप्रभव आत्मा एतावन्महति साहसे नियोज्यायासितः ।)

मन्मथः – मञ्जुभाषिणि, किं ब्रवीष्यात्मा मयाऽऽयासित इति ?

मर्षयामि कथं ख्यातवीर्यस्त्वदपहारिणम् ।
सहते न हि पञ्चास्यः सटां लुम्पन्तमात्मनः ॥ ५

मायावती – (सस्नेहबहुमानम्, स्वगतम्) कहं णेण महाभाएण एत्थ जणे अप्पकेरं अत्तणं अणुवण्णीअदि । जइ वा ण खु परकेरओ णाम अत्थि सप्पुरिसाणं । (प्रकाशम्) महाभाअ एव्वं अणवेक्खिदप्पसरीरं परक्कमिअ असुर-करिमरिं मं मोइदवंतस्स महाभाअस्स केण पच्चुव-करिस्सं । सव्वहा साहीणो खु अत्तहोदो एस जणो कअविक्कआणं । (कथमनेन महाभागेनात्र जने आत्मीयत्वमनुवर्ण्यते । यदि वा न खलु परकीयो नामास्ति सत्पुरुषाणाम् । महाभाग, एवमनवेक्षितात्मशरीरं पराक्रम्यासुरबन्दीं मां मोचितवतो महाभागस्य केन प्रत्युपकरिष्यामि । सर्वथा स्वाधीनः खल्वत्रभवत एष जनः क्रयविक्रययोः ।)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मन्मथः — (सप्रमोदम्) कृतज्ञे, किमिदमपि वक्तव्यम् ।

(निपुणं निरूप्य सवितर्कमात्मगतम्)

संस्थानं वपुषस्तदेव सुषमा सैवाननेन्दोरियं
नेत्राम्भोरुहयोस्तदेव सरसं साकूतविप्रेक्षितम् ।
प्रेमार्द्रं वचनं तदेव सुतनोरस्या न जाने परं
सैव स्यात् किमियं न वेति तु कुतः सन्देग्धि मे मानसम् ॥

अथवा,

असुराभिमर्शजन्मा परिक्लिष्टतैव रूपस्य प्रियायां मे विकल्पहेतुः । समुत्सुका च तावदियं स्वजनदर्शनेन स्यात् । तदेनां यावत् पितृकुलं प्रापयामि (इति रथेन परिक्रामन् आकाशे) कोकिलक, किं ब्रवीषि, "सम्प्रत्यत्रैव तत्र भवता रागस्य भवने सन्निहितायै भगवत्यै महाभागायाश्च रत्या गुरुजनायास्सदागमनं निवेदयितुं गच्छामी"ति । भद्र, तथा क्रियताम् । अहमप्यनुपदमागत एव तावत् । अभिवादनीया ह्यकारणवत्सला मे भगवती । (इति किञ्चिदन्तरं गत्वा रथादवतीर्णो मायावत्यासहरागस्य गृहे प्रवेशं नाटयति)

सर्वार्थसाधिका — (स्वगतम्)

किमपि जनितो रागोऽन्योन्यं रतिस्मरयोरना-
कलितमनयोः प्राप्ता युक्त्या विपच्च निराकृता ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

परिणयविधिं निर्वर्त्यैकं तु शिष्टमथो पुनः
पदसरसिजं सेवे मातुः स्वनुष्ठितशासना ॥ ७

मन्मथः – (सर्वार्थसाधिकां निर्वर्ण्य, सगौरवमात्मगतम्) अहो, माहानुभाव्यं भगवत्याः ?

तथा हि अस्याः —

चक्षुर्दयारसार्द्रं
चेतोवृत्तिः प्रसन्नगम्भीरा ।
तुलनातीता मूर्ति-
स्तेजस्तेजस्विनामपि दुरापम् ॥ ८

(रतिमवलोक्य सविस्मयम्) केयं प्रियारूप संवादिनीमाकृतिं बिभ्रती भगवत्याः पार्श्वं परिष्करोति ? (सवितर्कम्)

इयं सा किं जज्ञे सुतनुरुत सैवेयमभवद्-
विभिन्नेवैते द्वे जगति जयतोऽन्योन्यसदृशौ ।
प्रियाया मे नास्मिन् क्वचन सदृशी कापि घटते
प्रियाभूते लोके तदिदमपि हि भ्रान्तिलसितम् ॥ ९

कुतो वा भ्रान्तिर्यत्प्रबोधवतोऽपि मे पुरः स्फुरत्येवेयम्।

रतिः – (मन्मथं दृष्ट्वा सानन्दम्) दिट्ठिआ लद्धविअओ एस महाभाओ कुसली एत्थ एव्व समाआदो । (मायावतीमवलोक्य, सासूयम्) का णु एसा तरट्टिआ अहं विअ मह वि दुल्लहं इमस्स महाभाअस्स पस्ससेवणसुहं

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अणुहोइ । (दिष्ट्या लब्धविजय एष महाभागः कुशल्यत्रैव समायातः । कान्त्येषा तरुणी अहमिव ममापि दुर्लभममुष्य महाभागस्य पार्श्वसेवनसुखमनुभवति ।)

(सवितर्कं, संस्कृतमाश्रित्य)

याताऽहं किममुष्य पार्श्वमधुना वैयात्यलब्धास्पदा
प्राप्तः किं नु स एष वा परिसरं प्रेम्णा स्वयं मामकम् ।
अभ्याशे घटते कथं गुरुजनस्यैतच्च वा पश्यतो
जाने कावपि सङ्गतावहमिव प्रेयानिवैतावुभौ ॥ १०

(इति विस्मितस्तिमिताऽवतिष्ठते)

मायावती — (रतिं विलोक्य, स्वगतम्) कहं विअ अहं अज्जाणं समीवे ठिअ म्हि । (विमृश्य) अम्हो मह वामोहो एत्थ एव्वा अवट्ठिआए । जं पस्सगओ खु इमो महाभाओ । अण्णं वि एसा दाव ईसारोसकसाइदेण चक्खुणा मं पुक्खइ । ण उण अप्पा अप्पणो असूआभाअणं होजाइ । ता का वि अण्णा एसा मह सरिसं रूवं वोलंबइ । (कथमिवाहमार्याणां समीपे स्थिताऽस्मि । अहो मम व्यामोहोऽत्रैव पर्यवस्थितायाः, यत्पार्श्वगतः खलु मेऽयं महाभागः । अन्यच्चैषा पुनरीर्ष्यारोषकषायितेन चक्षुषा मां पश्यति । न पुनरात्माऽऽत्मनोऽसूयाभाजनं भवेत् । तत्काऽप्यन्यैषा मम सदृशं रूपमवलम्बते ।)

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सख्यौ — (मन्मथमवेक्ष्य जनान्तिकम्) दिट्ठिआ पच्चागअं पिअसहीजीविदेण । (मायावती निरूप्य च) कहं णो पिअसही एक्क पअम्मि विमुक्कण्ण आणुरूवसमाअरणा एआरिसी संवुत्ता । जं गुलुअणसविहे वि वल्लहपस्सगआ णिव्विसंकंठाइ । (दिष्ट्या प्रत्यागतं प्रियसखीजीवितेन । कथमावयोः प्रियसखी एकपदे विमुक्तकन्यकानुरूपसमाचरणा एतादृशी संवृत्ता । यद् गुरुजनसविधेऽपि वल्लभपार्श्वगता निर्विशङ्कं तिष्ठति ।)

रागः — (मायावतीं मन्मथञ्च विलोक्य, सहर्षसम्भ्रमौत्सुक्यम्) हन्त, प्राप्तेयं मे वत्सा? एष च विजयी कुमारः ।

मुदिता — (सबाष्पम्) एसा मे जादा दिट्ठिआ मिच्चुमुहादो पच्चागआ । (एषा मम जाता दिष्ट्या मृत्युमुखात् प्रत्यागता ।)

[इत्युभौ सरभसमुत्थातुमिच्छतः]

रतिः — ताद अज्जू एसा खु अहं एत्थ एव्व थक्कामि । (अम्ब, तात एषा खल्वहमत्रैव तिष्ठामि ।)

[मुदितारागौ वैलक्ष्यं नाटयतः]

वशिनी — (आत्मगतम्) अहो सैवामीषां व्यामोहानुवृत्तिर्विदितमायावतीनिर्माणवृत्तान्तानामपि ।

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सर्वार्थसाधिका – [मन्मथं निर्वर्ण्य सवात्सल्यम्, स्वगतम्]

त्रिजितारातिरङ्गेषु विक्षतो हेतिभिर्द्विषाम् ।
हृदयं मे कुमारोऽयं धिनोति च धुनोति च ॥ ११

मन्मथः — (अग्रतोऽवलोक्य) एषा हि भगवती वात्सल्यविस्फारितेनाक्ष्णा पिबन्तीव मामवेक्षते, गुरुजनश्चायम् । यावदुपसर्पामि । (इत्युपसृत्य) भगवति, अभिवादयतेऽयं मन्मथः ।

सर्वार्थसाधिका– कुमार, आम्रेडितकल्याणो भूयाः ।

(इति सविधमुपवेश्य पाणिना मन्मथस्याङ्गमङ्गं परामृशन्ती तिरोहितक्षतरेखं करोति)

मायावती — भअवइ, पणमामि । (भगवति, प्रणमामि ।)

सर्वार्थसाधिका– वत्से, अभिमतवरसङ्गता भूयाः । (मुदितारागौ प्रदर्श्य मायवतीमन्मथौ प्रति) कुमार, वत्से वत्सायाः पितरौ, प्रणमतमेनौ । (उभौ तथा कुरुतः)

रागः — कुमार, कल्याणि, चिरं जीवतम् ।

मुदितारागौ– सुहिदा होंतु भवंता । (सुखिनौ भवतं भवन्तौ ।)

सर्वार्थसाधिका – (मुदितारागौ प्रति) महाभागौ, एष खलु मायावती नाम वत्सां रतिमसुराधमादपवाहयितुं मया योगप्रभावनिर्मिता धर्मतो वां दुहितैव ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मन्मथः — (स्वगतम्) अहो भगवत्याः प्रभावो वात्सल्यञ्च मयि ।

रतिः — (स्वगतम्) अम्हो एदस्सिं जणे पक्खवादो भअवदीए ।)
(अहो एतस्मिन् जने पक्षपातो भगवत्याः ।)

रागः — (सप्रश्रयम्) भगवति, किमिहापि संशयो यदाह भगवती?
(इति मायावतीमङ्कमुपनीय मूर्ध्नि समाजिघ्रति)

मुदिता — जादे, जादाए जीविदप्पदाइणि, इदो आअच्छ । (जाते, जाताया जीवितप्रदायिनि, इत आगच्छ ।)

(इति प्रेमनिर्भरं तामालिङ्गति)

सर्वार्थसाधिका – (रतिं प्रति) वत्से, इयं ते स्वसा, प्रतिगृहाणैनाम् ।

रतिः — (मायावतीं हस्ते गृहीत्वाऽऽत्मनः सकाशमानयति)

मन्मथः — (रतिमायावत्यौ निरूप्य साशंसमात्मगतम्)

अपि स्यान्मे पाणिग्रहणमुभयोस्तुल्यमनयो-
र्भवेतां वा स्निग्धे अपि जहदसूयं पुनरिमे ।
सहैताभ्यां रात्रावपि कुसुमतल्पं श्रितवतो
भवेत् स्वैरं पार्श्वद्वितयपरिवृत्तिश्च सफला ॥ १२

मायावती — (सवितर्कमात्मगतम्) शम्मिट्ठाए विअ परोवसज्जणीभूदाए मह दुल्लहो खु पडिभाइ महाभाएण समाअमो, अह वा वच्छला खु भअवई । शर्मिष्ठाया इव परावर्जनीभूताया

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मम दुर्लभः खलु प्रतिभाति महाभागेन समागमः । अथवा प्रियवत्सलः खलु भगवती ।)

सर्वार्थसाधिका -- (मुदितारागौ प्रति) महाभागौ, इयमपि मायावती कुमारमन्मथमेव वरमर्हति ।

रागः — यदादिशति भगवती ।

मुदिता — (साङ्गीकारमिव) जं अणुमदं पिअसहीए । (यदनुमतं प्रियसख्याः ।)

सर्वार्थसाधिका — (रतिं प्रति) वत्से, निर्वोढव्यकुटुम्बभरया भवत्या तावदसावात्मनः प्रत्यनन्तरीक्रियताम् ।

रतिः — (सेर्ष्यावहित्थम्) भअवइ, परवंतो खु अयं जणो तुम्हेहिं । (भगवति, परवान् खल्वयं जनो युष्माभिः ।)

सख्यौ — (सवैमनस्यम्, अपवार्य) एदं वि एक्कं हि अअसल्लं आवडिदं खु णो पिअसहीए । एतदप्येकं हृदयशल्य-मापतितं खलु नौ प्रियसख्याः ।)

मन्मथः — (सानन्दं, स्वगतम्) अहो भावज्ञता भगवत्याः, यन्मे मनोरथानुरूपमादिष्टम् ।

मायावती— किदम्हि चरिअत्था अहं भअवईए अप्पणो णिम्मिदी । (कृताऽस्मि चरितार्थाऽहं भगवत्या आत्मनो निर्मिता: ।)

मन्मथः — (मायावत्याः कृते स्वस्मिन्नातिप्रीतामेमां रतिं निर्वर्ण्य)

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

औदासीन्यमनद्दतस्मितरुचा वक्त्रेन्दुना सूचय-
न्त्यंसन्यस्तकपोलमन्तिकजुषः सख्याश्चिरं तस्थुषी ।
तिर्यक् संवलितेन किञ्चिदरुणप्रान्तेन भुग्नभ्रुणा
वामाक्ष्णाऽद्य निरीक्षते प्रियतमा सैवान्यसन्येव माम् ॥

किञ्च –

अरालभ्रूवल्लिस्तिमिततरतारं विवलितं
तिरः शोणां छायां परिवहदपाङ्गं मुकुलितम् ।
स्वपार्श्वस्थामेतां प्रतिकिरति चक्षुर्वरतनुः
सपत्न्यां सोदर्यामपि हि सुलभेर्ष्या युवतयः ॥ १४

अथाप्यवशोदित्वरेणास्या भावविशेषेण व्यज्यत एव मय्यनुरागः । तथाहि –

गुरुजनसन्निधे मां प्रेक्ष्य तीर्णप्रवासं
कथमपि न कृशाङ्गी हर्षमाविष्करोति ।
तदपि स विदितो मे दूरगूढोऽन्तरस्याः
पुलकमुकुलपाल्या मण्डयन्त्याङ्गमङ्गम् ॥ १५

सर्वार्थसाधिका – (वशिनीं प्रति) ब्रूहि वत्से, मद्वचसा तत्रभवन्तं समहेन्द्रमुपेन्द्रम् । "भगवन्, अद्यैव प्रशस्तो मुहूर्तो निवेद्यते मौहूर्तिकैः कुमारमन्मथस्य रतिमायावतीपाणिग्रहण-मङ्गलविधौ । तदत्रोपवनकल्पद्रुमतले कल्पितमण्डनः कल्याणमण्डपः परिष्क्रियतामचिरात् सपरिवारमत्र-भवद्भिरि"ति ।

CC-0T Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

वशिनी — यदादिशति भगवती । (इति निष्क्रम्य पुनः पुरुषेण सह प्रविश्य) भगवति, अभिनन्दितभवत्सन्देशेन साग्रजेन श्रीरमणेन प्रहितोऽयमाप्तःपुरुषः ।

पुरुषः — (सप्रणामम्) भगवति, एषा भगवतः प्रणयोक्तिः — यथा, प्रतिपाद्येते अधुनैव वत्से देवसेनेन्द्रसेने तत्रभवते महासेनाय । अतो भगवत्या वत्सं मन्मथं सखायं रागञ्च सहादाय समागतयाऽनुभूतैतदुत्सवदर्शनसुखमनुपदमेव निर्वर्तयिष्यते वत्सयोरपि रतिमायावत्योः करग्रहमङ्गलमिति ।

सर्वार्थसाधिका- (सहर्षं, मन्मथं प्रति) कुमार, समुचितमाचरितं तत्रभवद्भ्यां स्वस्त्रिये स्वस्याथ च महोपकारिणि तारकवैरिणि । आचारश्चायं शिष्टानुमतो यत्कन्याप्रतिपादनसमनन्तरं वधूपरिग्रह इति । तत्सम्भावयतु भवांश्चिराय निजसन्दर्शनेनोत्सुकं बन्धुजनम् । (पुरुषमवेक्ष्य) भद्र, निवेदय भगवते । मया पुनर्महाभागेन च रागेणानयोर्वत्सयोः परिणयोपकरणसिद्धिव्यापृततयाऽसौ वश्रवणरसायनीकरिष्यते स महोत्सव इति ।

मन्मथः — नियुङ्क्ते भगवती । (इति निष्क्रान्तः, पुरुषश्च)

रतिमायावत्यौ- (सोत्कण्ठमात्मगतम्) हि अअ, पंचसत्वणमेत्तभाविणीए वि मणरहसिज्झीए कथं एव्वं पज्जूसुअं सि ? अम्हो

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सच्चं खु एदं लोअवअणं जं पडिक्खिदाए वि पाअणिप्पत्तीए उण्होवसमविलंबासहणत्तणं त्ति । (हृदय, पञ्चषक्षणमात्रभाविन्यामपि मनोरथसिद्धौ कथमेतावत्पर्युत्सुकमसि ? अहो सत्यं खल्वेतत् लोकवचनं यत्प्रतीक्षितायामपि पाकनिष्पत्तावुष्णोपशमविलम्बासहनत्वमिति ।)

(नेपथ्ये दिव्यदुन्दुभिध्वनिः कुसुमवृष्टिश्च)

सर्वार्थसाधिका – (आकर्ण्य सहर्षम्) जाने निवृत्तपाणिपीडनमङ्गले कल्याण्यौ देवसेनेन्द्रसेने ।

वशिनी — (कर्णं दत्वा ससम्भ्रमम्) भगवति, यथाऽयमधिप्रतोलि मुखरितनिखिलहरिन्मुखं निबिडीभवति विविधातोद्यनिस्वनाडम्बरः, तथा तर्कयामि नेदीयानितो जन्यवर्ग इति ।

सर्वार्थसाधिका – शोभतेतरां हि शोभने विधौ त्वरातिरेकः । (मुदितारागौ प्रति) महाभागौ, युवामप्येताभ्यां सह वत्साभ्यां नेदीयसीं कुरुतं विवाहमङ्गलवेदीम् ।

रागः — यदादिशति भगवती ।

(इति वशिनीवर्जं सहेतराभिर्निष्क्रान्तः)

(नेपथ्ये)

अपि कुशलमत्रभवत्यै !

सर्वार्थसाधिका – (तदभिमुखमवलोक्य) हन्त, सम्प्राप्ता एव सम्बन्धिनोऽमी ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

(इति ससम्भ्रममुत्थाय तान् प्रति सादरम्)

स्वागतं तत्र भवद्भ्योऽलङ्क्रियन्तां सोपबर्हाणि महार्हाण्यास्तरणानि ।

(इत्युपविष्टेषु तेषु स्वयमासने समुपविशति)

[नेपथ्ये, मङ्गल्यवादित्रनिस्वनानन्तरं पुरोधसोरेकः पठति]

आस्थानीमुपसेदुषां सुरमहर्षीणां पुरःकीर्तिते
 शैलेन्द्रेण निजेऽन्वयेऽथ विधिना देवस्य शम्भोःकुलम् ।
वक्तुं मौनजुषा प्रवर्तितमपि स्वैरं तदा सस्मितैः-
 सर्वैरप्युररीकृतं परिणये वाङ्निश्चितं पातु वः ॥ १६ इति ।

वशिनी — (सोल्लासम्) भगवति, वधूवराणां वाग्दानसम्पत्तिसूचकं पद्यमिदम् ।

[पुनर्नेपथ्ये]

द्वितीयः —

गौरीशङ्करयोः पुराञ्जलिपुटे स्वेदोदबिन्दूपमा
 न्यस्ता मूर्ध्नि मिथो हिमांशुमभितस्तारानुकारास्ततः ।
कीर्णाश्चाश समन्ततः सुकरोन्मुक्तप्रसूनायिता
 मुक्ताः सन्तुतरां करग्रहविधौ भव्याय वो भूयसे ॥ १७

सर्वार्थसाधिका - (सानन्दम्) निर्वृत्तं हि पाणिग्रहणमङ्गलं वत्सानाम् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

वशिनी — (पुरतो निरूप्य) भगवति, एते खलु सम्बन्धिनो जिगमिषन्त इव स्वान् गृहान् प्रत्यालक्ष्यन्ते ।

(पुनश्च नेपथ्ये)

अत्र भवति, सुविहितसमुदाचाराः स्मः, तदनुजानीहि नः, गृहान् प्रति गमनाय । अयञ्च वधूपरिष्कृतो वत्सो मन्मथः समनुप्राप्तः तत्रभवतीमभिवादयितुम् ।

सर्वार्थसाधिका – (जागरूकादरं, जन्यान् प्रति) साधयन्तु तत्रभवन्तः सनाथीकृतमिदं कुलं भवद्भिः ।

(इति प्रस्थितेषु तेषु सर्वेषु पुनरासनमध्यास्ते ।)

(ततः प्रविशति गृहीतविवाहोचितनैपथ्याभ्यां रतिमायावतीभ्यां सह वरालङ्कारी मन्मथः)

मन्मथः — (सानन्दमात्मगतम्) अहो परिणामरमणीयता दैवानुकूल्यस्य ।

प्रथमं सुखाङ्कुरोद्गति-
रवग्रहोऽनन्तरं तदुन्मेषः ।
पुनरपि तत्परिहारो
मङ्गलमधुना तु मङ्गलोन्मिश्रम् ॥ १८

सर्वार्थसाधिका – (सादरं मन्मथमवलोक्य सोल्लासं, स्वगतम्)

अयं हि —

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

रत्या च मायावत्या च रम्यपार्श्वद्वयः स्मरः ।
प्रतिभाति सुधासूतिः फल्गुन्योरिव मध्यगः ॥ १९

(मन्मथः सविनयमुपसृत्य प्रियतमाभ्यां सह सर्वार्थसाधिकायाः पादावुपसंगृह्णाति)

सर्वार्थसाधिका – (सप्रेम तानभिनन्दन्ती)

वेले सिन्धुरिव त्वं वध्वौ तुल्यं कुमार धिनु शश्वत् ।
वत्से युवां जुषेथां गङ्गायमुने इव प्रियमभिन्ने ॥ २०

मन्मथः — (सप्रश्रयम्) भगवति, किं बहुनोपचारोक्तिपल्लवेन । सर्वथा वात्सल्यानुरूपमाचरितं गर्भरूपेषु भगवत्या ।

सर्वार्थसाधिका – कुमार, निदेशोऽयमीदृशः श्रीमत्याः सिंहासनेश्वर्याः । यथा, वत्से, निर्वृत्ते परिणयोत्सवे वत्सं मन्मथं निज-सन्दर्शनावसरदानेन कृतार्थयिष्य इति ।

मन्मथः — (सप्रमोदम्) भगवति, धन्योऽस्मि । किमन्यदितोऽप्या-शास्यमस्य जनस्य ?

सर्वार्थसाधिका– तदेहि, यामः श्रीमातुश्चरणारविन्दमूलम् । (इत्युत्थाय नेपथ्याभिमुखी रागमापृच्छ्य सभार्येण मन्मथेन सह परिक्रामन्ती समुन्नतगोपुरं श्रीपुरमासाद्य पुरतो वितीर्ण-चक्षुर्मन्मथं प्रति) कुमार, इदं हि महार्हमणिगणसुन्दर-मम्बायास्त्रिपुरसुन्दर्या मन्दिरम् । यावत्प्रविशामः ।

[इति सर्वे तत्र प्रवेशं नाटयन्ति]

मन्मथः — [सर्वतोऽवलोक्य साश्चर्यम्, स्वगतम्]

स्वप्रभेण तदनेन जनन्याः सद्मना दिनकराद्यपि तेजः ।
अभ्यभावि यदि नाम परेषां चाक्षुषी प्रभवतु क्वनुशक्तिः ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

[ततःप्रविशति सिंहासनगतस्य भगवतः कामेश्वरस्याङ्कं परिष्कुर्वती देवी विभवतश्च परिवारः]

देवी — (सर्वार्थसाधिकामनूपनमतो वधूवरानवलोक्य, स्वगतम्) निर्व्यूढाऽस्मन्निदेशा हि वत्सैषा । वत्सश्चायं कामःपूर्णकामः-सम्पन्नः ।

(इति सप्रसादं तान् कटाक्षैरनुगृह्णाति)

मन्मथः — (दूरादेव जगदम्बामवलोकयन्, सहर्षरोमाञ्चसम्भ्रममात्मगतम्)

मयूखैः प्रत्यङ्गाद् बहलमुदयद्भिर्विदधती
समुन्मीलद्बालातपमिव हरिच्चक्रमखिलम् ।
दधाना सौभाग्यं किमपि ललिताम्बाऽतिललितं
ममेदानीं दिष्ट्या सरणिमवतीर्णा नयनयोः ॥ २२

अये चरितार्थोऽस्मितराम्, यतः —

उदारान् स्वाभाव्यात् सितसरसिजश्रीसहचरान्
मयि स्मेरस्मेरानमृतलहरीगर्भशिशिरान् ।
विधुन्वानांस्तापत्रितयमपि लोकैकजननी
जयाधारा तुङ्गाननुकलमपाङ्गान् विकिरति ॥ २३

इति ससम्भ्रममुपसृत्य प्रेयसीभ्यां सह देव्याश्चरणारविन्दयो रत्नानि विकीर्य साष्टाङ्गं, प्रणमति)

सर्वार्थसाधिका- (प्रणम्योत्थाय) अम्ब, एष वधूसहितः कुमारमन्मथोऽभिवादयते ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

देवी — वत्साः, सानन्दमेधध्वम् । (इति सर्वार्थसाधिकामवलोकते)

सर्वार्थसाधिका – कुमार, वत्से, समुत्तिष्ठत । प्रसादसुमुखी सम्पन्ना युष्मासु श्रीमाता ।

मन्मथः — (सदारः समुत्थाय सादरं कृताञ्जलिबन्धः सानन्दगद्गदम्)

जय सर्वलोकमातर्जय कामेशाङ्कगे जय त्रिपुरे ।
जय करुणावशहृदये जय ललिताम्ब प्रसीद शिशवे मे ॥ २४

जय जय जगदम्ब दीनावलम्बानुकूले कदम्बाटवीवासलोलेऽतिलोलम्बकेशि क्षपानाथबिम्बाभवक्त्रे मृगीलोलनेत्रेऽम्बिके बिम्बहृद्याधरे कम्बुवत्कन्धरे कुम्भिकुम्भोपमोरोजकुम्भे हृतोद्वृत्तदम्भे लताडम्बरद्रोहिबाहे मृगाधीशवाहेऽत्वलभ्योपमेयाम्बरे मातारागुल्फ संलम्बिशोणाम्बरे हेमरम्भामदारम्भसंस्तम्भनोज्जृम्भितोरुद्वयि त्र्यम्बकाम्भोजनेत्रस्वयम्भूमुखस्वर्गिसंराद्धपादाम्बुजाते नितान्ताभिजाते समुद्यत्सहस्रांशुकोटीविडम्बार्हदेहप्रभारुण्यपूरोदये कन्धरादभ्रनिर्विघ्नपुष्यद्दये रागरूपेण पाशेन रोषात्मकेनांशुकेनापि चेतोमयेनेक्षुचापेन पुष्पैश्शरैः पञ्चतन्मात्रसारैः करेष्वञ्चिते ॥

परिचितनवयौवने देवि कामेशवामाङ्कगे पञ्चमूर्त्यात्मकं मञ्चमध्यासिते सुस्थिते मेरुशृङ्गस्थलस्थानुना तुङ्गतुङ्गेन रत्नप्रभाविस्फुरद्गोपुरेणोच्चकैः श्रीपुरेणाभितो वेष्टितं चारुचिन्तामणीसद्म पद्माटवीहृद्यमासाद्य सम्मोदमानेऽसमाने नवावृत्युपेतं दृगानन्दनं स्यन्दनं चक्रराजात्मकं भेजुषी-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

भिर्मनोदेवताद्यभिरत्राणिमान्ताभिराराधिते शक्तिभिर्भक्तिनम्रात्मभिः मन्त्रिणीमन्त्रदत्तावधाने तथा दण्डनाथासमायत्तसेनाधिपत्ये ससम्पत्करी वाजिरूढा निरूढद्विपाश्वाधिकारे सदा निर्विकारे लसल्लीलया बालयाऽऽनन्दिते वन्दिते योगिभिःसेव्यमाने गिरा च श्रिया पार्श्वयोर्दण्डितोद्दण्डभण्डासुरे भासुरे भूषणैः ॥

निरवधिमहिमाद्भुते चिन्मयि श्रीशिवे मन्मथोऽहं कियान्नाम सामादिभिःसंस्तुते यत्प्रसूनैर्मितैः सायाकैर्धन्वना नन्वनायासनम्येन मौर्व्या च निर्व्याजशैथिल्यया स्पन्दमानेन मन्दं बत स्पन्दनेनाचला धक्यभाजा बलेन द्विमासात्मकोन्मेषयोग्येन सामन्तभाग्येन मित्रेण च ह्रासपात्रेण सम्मोहये विश्वमेतत्परिभ्रंशयेऽसंशयं योगिनो यच्च वा योगतो भोगतोषं विनाऽपि यत्फालनेत्रं सुदुर्लङ्घमायाशताडम्बरं शम्बरं यज्जघानाधुना यत्पुनस्तुङ्गमासादयं भङ्गलब्धेदृशं सस्वभाव प्रसर्पत्कृपाद्वीपिनीपूरकल्लोलभङ्गीजुषां तावकापाङ्गभासां मयि स्वैरमुल्लासलीलानुभावो न किम् ॥

शरणमुपगतस्त्वायं जनो दासदासो निजाविद्यया विद्यमानान्यया मोहितो नो हितं वेद, वेदान्तवेद्ये मुहुर्गर्भवासादिभिर्निर्भरैर्दुःखभारैः पराभूयते पुत्रभार्यापशुक्षेत्रमित्रादिभाजा ममत्वेन तत्त्वातिगे दूयते हन्त दग्धोदरस्यास्य हेतोस्तडिल्लोलयाऽपि श्रिया लब्धयाऽखर्वगर्वानलानीश्वरान् शश्वदासेवमानो भृशं क्लिश्यते

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तृष्णयाऽत्युष्णचेताः सदा पर्यटाट्यापरो दिक्षु विक्षिप्य-
माणोऽरिभिश्चान्तरैर्बलिदूर्वाग्रखेलत्तुषाराम्बुलेशांशवद्भङ्गुरं
न स्मरन् पङ्गुरन्धो यथा यापयत्येवमायुर्मुधाः, सर्वथा
तावदेनं महाराज्ञि संयोजय श्रेयसाभूयसा सप्रसादं नमस्ते
समस्ते हितप्रापिके ॥

पुष्पेण बाणवत्यै
पुण्ड्राख्येनेक्षुणा धनुष्मत्यै ।
पुररिपुणा पतिवत्न्यै
पुत्रिण्यै स्यान्मया नमो मात्रे ॥ २५

वतंसितमजादिभिर्जननि ते पदाब्जं विना
मितम्पचमुपाश्रये क इव हन्त देवान्तरम् ।
जरामरणघस्मरे सति सुधारसे सन्निधौ
जनः किमविचक्षणोऽप्यविमारीसमास्वादयेत् ॥ २६

देवी — (सानुग्रहम्) वत्स, किमाशास्यं तव !

मन्मथः — अम्ब, इदमेव । (इत्यर्धोक्ते प्रमोदपारवश्यं नाटयित्वा, सरोमाञ्चगद्गदम्)

ऐन्दव्या कलयाञ्चितं कचभरे मन्दस्मितालङ्कृतं
वक्त्रे सान्द्रदयं हृदि स्तनतटे तुङ्गं नितम्बे ततम् ।
पादाब्जे मृदुलं सशोणवसनं बन्धूकबन्धुप्रभं
रूपं तावकमम्ब मङ्गलमिदं मे सन्निधत्तां सदा ॥ २७

देवी — वत्स, अत्रैव मम सन्निहितमावरणमधिष्ठाय स्वनियोगमशून्यं कुरु ।

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मन्मथः — (सानन्दबाष्पम्) अम्ब, श्रेयसामतिभूमिं गमितोऽस्मि ।

देवी — वत्स, किं ते भूयः प्रियमादिशामि ?

मन्मथः — (सप्रणामम्) अम्ब, किमितोऽपि प्रियतरमस्ति मे ।

फालाक्षोऽपि वशीकृतो ननु मया मातर्यदेभिः शरै-
मयावी स च शम्बरो यदवशान्मध्येरणं शायितः ।
एकां प्रार्थयता रतिं यदपरा लब्धा च मायावती
त्वत्सान्निध्यजुषोऽपि तन्मय किमाशास्यान्तरं वर्तते ॥ २८

तथापीदमस्तु,

॥ भरतवाक्यम् ॥

मोदन्तां हतशात्रवाश्चिरतरं धात्रीश्वरा धार्मिकाः
स्वैरोन्मीलितसस्यजातसुभगं वर्षन्तु धाराधराः ।
वीरोदारसुधीगृहेषु विहृतिं बध्नातु पद्मालया
चातुर्वर्ण्यमपि स्वधर्मनिरतं नित्योत्सवैरेधताम् ॥ २९

(इति निष्क्रान्ताः सर्वे)

॥ इति जगन्नाथपण्डितकृतौ रतिमन्मथे नाटके पञ्चमोऽङ्कः ॥

॥ सम्पूर्णमिदं नाटकम् ॥

॥ मङ्गलानि भवन्तु ॥

CC-0T Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ श्लोकानुक्रमणिका ॥

	अङ्कः	श्लोकः	पृष्टम्
अत्रान्तरे च	4	8	92
अधरमधुनो	2	9	41
अनिन्दुरुचिरा	2	17	48
अनुरागातिशयं	2	27	55
अन्येन्द्रं	1	4	3
अपि स्यान्मे	5	12	124
अरालभ्रूवल्लि	5	14	126
अस्त्याधार	1	6	4
अस्निग्धैः	1	27	21
अस्याः सखे	2	13	47
अधिरूढ	4	4	90
आदातुं सह	1	21	17
आपाण्डुदुर्बल	3	44	85
आरक्तया	2	28	56
आलिङ्गन्	3	29	75
आलेख्यथे	2	2	28
आविर्भूता	3	45	86
आशङ्कयः	3	1	62
आस्थानीं	5	16	129
इतो देवैः	3	18	69

CC-0.Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

	अङ्कः	श्लोकः	पृष्ठम्
इतो मुखरिता	1	16	12
इयं सा	5	9	120
उक्तमनुक्तं	3	16	68
उच्छ्रीयन्तां	5	1	116
उत्खातासि	4	43	113
उत्तालाः कुरु	3	33	76
उदारान्	5	23	132
उन्नालाम्बु	1	29	25
एकतः स्वामि	3	14	67
एवस्मिन्निहित	1	10	5
एन्दव्या कलया	5	27	135
औदासीन्यमनादृत	5	13	126
कदा पीनोन्नम्रं	2	14	47
कंदो दश्याम	2	7	39
कामं सन्ति	1	12	8
कार्यान्तर	4	11	97
कासारे	2	29	56
किमपि जनितो	5	7	119
किं दावेन	2	25	54
किं दौहृदस्य	4	3	90
किं वा ते	3	24	71
कीराणामुदितं	1	9	5
कुन्दैरङ्कुरितं	1	14	11

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

	अङ्कः	श्लोकः	पृष्ठम्
कुर्वन्तो जगदे	4	38	110
क्व चक्षुर्लीला	2	12	45
क्षामा पाण्डु	2	21	52
क्षोणीमृत्कुल	3	47	88
खेलत्कुण्डल	3	38	78
गत्वा कियन्त्यपि	4	13	98
गुरुजन सविधे	5	15	126
गौरीशङ्करयोः	5	17	129
चक्रं तत्क्रमते	3	22	71
चक्रैश्छिन्दन्	4	34	108
चक्षुर्दया	5	8	120
चूषन्तः सलिलं	4	37	109
चूषन्नम्भांसि	3	39	79
जय सर्वलोक	5	24	133
जातां तनूजा	2	3	28
जाते सकौतुकया	4	6	91
जानीते न	2	22	53
जिह्वारङ्गस्थ	1	5	3
जीवातुस्त्रिदिवौकसां	3	31	76
तत्ताद्दक्कुशिक	3	37	78
तस्मिन्विस्मय	1	7	4
तां लङ्कां	4	22	102
तिर्यग्विव	1	22	18
दक्षा वा	3	15	68

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

	अङ्कः	श्लोकः	पृष्ठम्
दम्पत्योः	4	28	105
दावं हृद्य	2	20	51
दिशः कलुषिता	4	19	101
दूरोत्क्षिप्त	3	9	65
दृष्टे दैत्यपतिं	4	27	105
दृष्ट्वा मन्मथ	3	40	80
देवः शार्ङ्गधरः	2	4	29
द्राघीयसी	1	23	18
धत्ते किन्तु	4	14	98
धारा अपि	1	8	5
ध्यानेनोत्पुल	2	23	54
नक्तं प्राप्तदशा	3	11	66
नयनार्चिषा	3	41	82
नव नवसुदृक्	1	3	2
नासाकर्ण	2	8	40
निर्मातुं सिन्धु	4	10	96
निद्रामन्थर	3	10	65
पक्षाभ्यां	3	32	76
पशुतिर्यङ्नर	4	29	106
पश्यन्ति नहि	4	24	103
पादन्यासन	4	33	107
पादाक्रान्त	4	40	111
पादाप्रस्थितया	1	20	17
पितृभ्यां पर	1	18	14

CC-0T Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

	अङ्कः	श्लोकः	पृष्ठम्
पित्रोश्चुम्बति	3	46	86
पुञ्चैरञ्जन	4	36	10
पुरस्कृतस्यात्म	3	23	71
पुष्पेण बाण	5	25	135
प्रकटित चामर	3	36	78
प्रत्युद्याति	2	26	55
प्रथमं प्रासाद	4	7	91
प्रथम सुखाङ्कुरां	5	14	126
प्रस्विन्नपुलकित	1	28	23
प्रागह्नां त्रितया	2	1	27
प्रासाद शयन	3	30	75
प्रियमाश्वासन	4	18	101
फालाक्षोऽपि	5	28	136
फुक्कारप्प सरं	4	42	112
बर्हैः केरल	3	35	77
भृत्यो वा यदि	3	26	73
मदामोद भ्राम्यन्	3	27	74
मधुना रदच्छ	2	15	47
मधुरस पान	3	34	77
मन्थाद्रिक्षो	4	21	102
मयूखैः प्रत्य	5	22	132
मय्याकस्मिक	2	6	39
मरुप्रान्ते	4	23	103
मर्षयामि कथं	5	5	118

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

	अङ्कः	श्लोकः	पृष्ठम्
मलयसमीरो	3	28	74
मल्लीसेय	1	17	13
महोत्सेधः	3	7	65
मामन्यत्र	1	13	9
मा भूत्तम्रा	1	25	19
मा देहि	3	43	83
मूर्तेव नन्दन	2	5	38
मोदन्तां हत	5	29	136
यत्रास्ति प्रभु	3	3	62
यथैतैरुत्पातैः	4	20	102
यदेकस्मिन्नङ्गे	2	11	45
यद्रश्येन्द्रिय	3	12	66
युगपदुपात्त	4	44	113
यस्यालीयत	3	6	64
याताहं किममुष्य	5	10	121
या प्रक्लिन्न	2	10	43
रज्यत्युत्पलिनी	3	2	62
रत्या च माया	5	19	131
रथ्यायां चरता	1	11	6
रत्यैः पथ्यनुकूल	4	32	107
रमे जगति	4	26	105
रिङ्खन्तः सङ्ख्य	4	31	107
रोमाञ्चित	5	3	117
लावण्याम्बु	1	24	19

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

	अङ्कः	श्लोकः	पृष्ठम्
लीलालीढ	2	18	50
वतंसित	5	26	135
वरुणस्य दिशि	3	8	65
वसन्तः	2	19	50
वाहा गन्ध	3	17	68
विजितारति	5	11	123
वित्रस्ताखिल	4	12	98
वित्रस्तैण	5	2	116
वित्रस्तैरलकैः	5	4	117
वित्रस्तं कबरी	1	26	20
विवेकं न्यक्कुर्वन्	4	17	100
विहारे बालाभिः	4	5	90
वृक्षान् मङ्क्षु	4	39	110
वेगाक्रान्त	1	30	26
वेले सिन्धुरिव	5	20	131
वैजयन्तो जयन्तो	3	21	70
व्यानक्तीव	2	16	48
शक्त्या विशाखस्य	4	9	93
शतशोऽपि	3	20	69
शब्दाडम्बर	1	2	2
शस्त्रोत्कृत्त	4	35	108
श्च्योतद्घानाम्बु	4	30	107
संस्थानं वपुषः	5	6	119
सक्काथं चरणार्पणेन	2	24	54

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

	अङ्कः	श्लोकः	पृष्ठम्
सभ्यास्तावदितो	3	13	66
समादत्से	4	25	104
समुत्पन्ना	4	1	89
सम्मोहनास्त्र	4	45	115
स राजा	3	2	62
सर्वस्वं मे	4	16	100
साकूताः शशि	1	1	1
साधय साध्रय	3	25	72
सामान्येन	3	4	63
सिन्धोर्जन्म	1	15	12
सेयं सेयं	1	19	17
सोत्कण्ठं	3	42	83
स्फुरति नयनं	4	15	98
स्व प्रभेण	5	21	131
स्वाराज्यं	3	19	69
हविर्निर्वा	4	2	89
हेलानिक्षत	4	41	111

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

(SARASVATI MAHAL LIBRARY PRESS, THANJAVUR)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy